सुदर्शनश्च पथि निर्भयो गच्छन् नृपाणां सैन्यानि च पश्यन् स्वहृदि मनः- हतवक्रान्तगेताब्जदलपद्मासीनामाशेशवसेवितां स्वेष्टदेवतां जगदम्बां भवानीं विधिवद् भक्तिपूर्व्वकं ध्यात्वा तामेवैकान्तिकं शरणं जगाम कामराजाख्यस्य एकाक्षरं मन्त्रं जजाप ।

मार्गावरोधवर्त्तिनो युधाजित्प्रमुखाः सर्व्वे भूपालाः शत्रुजिता सह सकोलाहलं सुदर्शनरथस्य सम्मुखीना बभूवुः । तदा काशीपतिरपि ससैन्यः स्वजामातुः साहाय्यार्थं जगाम । एवमतिघोरे लोकक्षयकरे महानर्थमूले संग्रामे समुपस्थिते सुदर्शनेन ऐकान्तिकभक्त्या स्मृता नानायुधधरा वराभयकरा सिंह- वाहिनी भवानी देवी सहसा तत्राविर्बभूव । सुदर्शनस्तां निरीक्ष्य निजं सेनापतिं प्राह—"भो सेनापते ! पश्य मया स्मृता जगन्माता महादेवी कात्यायनी रक्ष- णार्थमत्र उपागता, मा भैषीः, दुष्टबुद्धयो राजानो नः किं करिष्यन्ति ?" एवं तत्र तुमुले संग्रामे समुपस्थिते सुदर्शनं प्रति क्रोधान्वितेन युधाजिता प्रक्षिप्तान् शरनिकरान् सुदर्शनस्तत्क्षणादेव स्वबाणैश्चिच्छेद । तदा सा दुष्टदलनी दुर्गा देवी स्वविभूतिभिः सह युधाजितं प्रति बाणान् मुमोच । तस्मिन् रणक्षेत्रे युधाजित् शत्रुजिच्च उभौ निहतौ । तदनुवर्त्तिनः सर्व्वे भूपास्तदवलोक्य परमविस्मयान्वितास्तस्थुः । काशीराजः परमप्रीतो भक्तिभावयुक्तेन मनसा दुर्गत- नाशिनीं दुर्गादेवीं प्रेमामृतस्राविणा स्तवेन तोषयित्वा इमं वरं लेभे यथा सुदर्शन- स्त्वया शत्रुभ्यो रक्षितस्तथा तथा सर्व्वदा वाराणसी रक्षितव्या । यावच्च मेदिनी तिष्ठति तावत्तस्यां मुक्तिपुर्य्यां वाराणस्यां सर्व्वलोकानां रक्षार्थं तस्या निवासो भविष्यतीति । सुदर्शनोऽपि परया भक्त्या जगदम्बां प्रणम्य तुष्टाव ।

(क्रमशः)

दर्शनपरीक्षा ।

आस्तिकनास्तिकदर्शनानां महर्षिप्रणीतानामैकमत्यमुत वैमत्यमिति विषये बहवस्तमःप्रकाशवद्विरुद्धस्वभावानां तेषां न कथमप्यैकमत्यमिति मन्यन्ते । वयन्तु मन्यामहे सर्वेषामपि दर्शनानां महर्षिप्रणीतानामेकवेदमूलत्वा- दुत्तममध्यमाधमाद्यधिकारिभेदेन प्रवृत्तानामापाततो विरोधेऽपि व्यावहारिकपारमार्थि- काभ्यां विषयविवेकेन वस्तुगत्यैकमत्यमेव सम्मतमिति । अन्यथा हि किं दर्शन-

मादरणीयं किं च परिहातव्यमिति निर्णयासंभवात्सर्वेषामपि दर्शनान्यप्रमाणानि भवेयुः । नहि क्रियायामिव वस्तुनि विकल्पः सम्भवति । तथाचाधिकारिभेदेन प्रवृत्तानामपि यावत्तत्त्वविनिर्णयमुपयोगः ननु कस्यापि दर्शनस्य सर्वथाऽऽनादरणीयत्वम् 'न बुद्धिभेदं जनयेदज्ञानां कर्मसंगिना'मिति न्यायेन विना दर्शनान्तरतत्त्वजिज्ञासां न दर्शनान्तरमुपदेष्टव्यम् । तैत्तिरीयोपनिषदि हि प्रथमं शरीरात्मत्वमुपदिश्य 'अन्योऽन्तर आत्मा प्राणमयः' । 'अन्योऽन्तर आत्मा मनोमयः' 'अन्योऽन्तर आत्मा विज्ञानमयः' 'अन्योऽन्तर आत्मा आनन्दमय' इत्यात्मतत्त्वोपदेशरीतिर्याऽद्भुता साप्येवमेवोपपद्यते ॥

यथाहि वैशेषिकादिदर्शनानि महर्षिप्रणीतानि एवं चार्वाकजैनबौद्धदर्शनान्यपि महर्षिप्रणीतान्येव । चार्वाकमतस्य हि प्रवर्त्तको बृहस्पतिः महर्षिरित्यत्र न विशयलेशोऽपि । बौद्धमतप्रवर्त्तको बुद्धमुनिरपि भगवदवतारपुरुषो महर्षिरेव । यथाह्यास्तिकाः स्वीयदर्शनप्रवर्त्तकान् गौतमादीन् महर्षीन् मन्यन्ते एवं नास्तिका अपि स्वमतप्रवर्त्तकान् महर्षीनेव जानन्ति ॥

ये हि कुमारिलपादा वेदप्रामाण्यसाधनेन धर्मपथव्यवस्थापनेन चास्तिकानां सर्वथा प्रमाणं कर्त्तव्याकर्त्तव्यादिविवेके तेऽपि अहिंसादिविषये शाक्यबौद्धादिस्मृतीनामसम्भाव्यमानवेदमूलकानां सम्भाव्यमानदृष्टहेतुकमन्वादिस्मृतीनामिवाप्रामाण्यं साधयन्तो मन्वादीनिव बुद्धादीनपि महर्षीनेव मन्यन्ते । सर्वथा च सर्वेषां दर्शनानामैकमत्यसंपादनमपेक्षितम् । कुमारिलपादा हि सर्वेषां विद्यास्थानानां वेदव्याख्यानाच्च धर्मे पर्यवसानं निरूपयन्ति । 'असदेवेदमग्र आसीत्' इत्यादौ असदादिपदव्याख्यानरूपं बौद्धादिदर्शनमित्युपपादयन्ति । सर्वथा च सर्वेषामपि दर्शनानामैकमत्यं कुमारिलपादानामपि सम्मतम् । मधुसूदनसरस्वत्योऽपि प्रस्थानभेदाभिधाने ग्रन्थे स्वकीये सर्वेषामपि दर्शनानामैकमत्यं निरूपयन्ति । तमिममर्थं यावच्छक्ति वैशेषिकादिसम्मतासत्कार्यवादादीनां सद्विवर्त्तवाद एव तात्पर्यमित्यादि निरूपणेन उपपादयामः । संक्षेपशारीरककारा अपि आरम्भवादपरिणामवादयोर्विवर्त्तवादोपोद्घाततां स्पष्टमेव निरूपयन्ति । ब्रह्मसूत्रकारा अपि 'भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत्' इति सूत्र लोकवत् इति दृष्टान्तेन परिणामवादं व्यवहारदृष्ट्याऽङ्गीकृत्य 'तदनन्यत्वमारम्भणशब्दादिभ्य' इति सूत्रेण सद्विवर्त्तवादं समर्थयन्तोऽस्माकमनुकूलाः । तदलं सविस्तरेणेति वैशेषिकादिसम्मतासत्कार्यवादादिस्वरूपनिरूपणनिरासादिना परमं तात्पर्यमद्वैते

सर्वेषां दर्शनानामित्युपपादयामः । तथाहि सः—वैशेषिकनैयायिकमीमांसकसांख्यपातञ्जलाद्वैतदर्शनानि षट् आस्तिकदर्शनानि । वैभाषिक सौत्रान्तिक योगाचार-माध्यमिक दिगम्बर चार्वाकदर्शनानि षट् नास्तिकदर्शनानि । तत्र वैशेषिक-नैयायिकयोरसत्कार्यवादः, चतुर्विधसौगतानां च स एव, मीमांसकसांख्यपातञ्जलानां सत्कार्यवादः । अद्वैतिनां सद्विवर्त्तवादः । असतः कार्यस्य सतः कारणात् असतः कारणाद्वा उत्पत्तिरसत्कार्यवादः । तत्रैवं नैयायिकसम्मता प्रक्रिया:—(a) सर्वकार्यद्रव्यविनाशः अवान्तरप्रलयः (b) सर्वकार्यध्वंसो महाप्रलयः । तत्र परमेश्वरस्य सिसृक्षायां सत्यां प्राणिनां कर्मवशेन निश्चलेष्वपि परमाणुषु क्रिया, परमाणुद्वयसंयोगश्च जायते । संयुक्ताभ्याञ्च परमाणुभ्यां द्व्यणुकादिक्रमेण कार्यजातं जन्यते । परमाणुषु प्रमाणं हि अनुमानम् । अनुमानप्रयोगो यथाः—कार्यद्रव्यं स्वन्यूनपरिमाणसंयोगसहितस्वसमानजातीयानेकद्रव्यारब्धम् कार्यत्वात्, तन्त्वारब्धपटवत् इति, यत् यत् कार्यं घटादिकं तत्सर्वं घटापेक्षया न्यूनपरिमाणस्य कपालस्य संयोगसहितेन कपालान्तरेण आरभ्यते । एवञ्च घटस्य कपालद्वयं कारणम्, कपालद्वयस्य कपालिकाद्वयं कारणम्, एवं क्रमेण चतुरणुकस्य त्र्यणुकम्, त्र्यणुकस्य द्व्यणुकम्, द्व्यणुकस्य परमाणुः इति । न च परमाण्वपेक्षया न्यूनं परिमाणं प्रसिद्धमिति तत्रैव विश्रान्तिरुक्तानुमानस्य । अस्यापि सत्कारणत्वे सृष्टिप्रलयाभावप्रसङ्गः; एवञ्च असत एव द्व्यणुकादेरुत्पत्तिः । सत्कार्यवादे तु सत उत्पत्त्यर्थम् कारकव्यापारो निष्फलः स्यात् । अतः सत्कार्यवादोऽयं न युक्तिसह इति ।

असत्कार्यवादोऽयं न सङ्गतः । असतः कार्यस्य यद्युत्पत्तिः, तर्हि शशशृङ्गमप्युत्पद्येत, असत्त्वाविशेषात् । उत्पत्तिप्रयोजकं असत्त्वमन्यादृशम् (शशशृङ्गविलक्षणं) न निर्वक्तुं शक्यते यदि प्रागभावप्रतियोगित्वेन शशशृङ्गात् विलक्षणं कार्यमुच्यते तर्हि प्रागभावप्रतियोगित्वमस्ति शशशृङ्गादेरिति । न चैवं युष्माभिर्वर्णयितुं शक्यते, प्रागभावप्रतियोगित्वं हि यस्योत्पत्तिस्तस्य भवति शशशृङ्गस्य तु असत्कार्यवादे उत्पत्तिर्वारयितुं न शक्यते । एवञ्च तस्यापि प्रागभावप्रतियोगित्वं भवत्येव ।

परमाणुभ्यां द्व्यणुकस्य या उत्पत्तिः क्रिया सा किं सद्रूपा उत असद्रूपा ? आद्ये कारकव्यापारवैयर्थ्यं, द्वितीये उत्पत्तेरुत्पत्तिः अस्या उत्पत्तिरित्यनवस्थाप्रसङ्गः । असत्त्वा उत्पत्तेरपि कार्यत्वात् ।

यदि घट एवोत्पत्तिस्तर्हि घट उत्पद्यते इति व्यवहारो न स्यात् । अतः स्वस्मिन् स्वसत्तासमवायः स्वकारणे स्वस्य समवायो वा उत्पत्तिरिति वर्णनीयम् । यच्चेदमपि सम्भवति समवायस्य निराकरिष्यमाणत्वात् ।

यथा च सावयवत्वेन हेतुना जगत् आद्यन्तवत् तेन 'न कदाचिदनीदृशं जगत्'इति मीमांसकसिद्धान्तो न युक्तः, यथाच कार्यं सकारणम् कार्यत्वादित्यनुमानविरोधात् स्वभाववादोऽपि न युक्तः, तथा परमाणुकारणवादोऽपि न युक्तः ॥ तथाहि परमाणूनामाद्या या क्रिया तत्र हि न यत्नः कारणम्, अशरीरत्वात् । एवमदृष्टकालो न कारणम् । अदृष्टं हि न स्वतन्त्रं कारणम् किन्तु चेतनाधिष्ठितम् । स च चेतनो न जीवः, नैयायिकमते प्रलये जीवस्याचेतनत्वात्, नापि ईश्वरः तस्य सदातनत्वेन कार्यकादाचित्कत्वानुपपत्तेः । किञ्चास्मिन् मते ईश्वरस्य प्रवृत्तिरेव न सम्भवति । यतः सुखे दुःखाभावे तत्साधने वा सुखार्थिनामेव खलु प्रवृत्तिः । नचेश्वरस्याप्तकामस्य सुखादिकमपेक्षितम् । एवञ्च प्रपञ्चसृष्ट्यर्थं ईश्वरप्रवृत्तिरपि नैयायिकमते न सम्भवति । किञ्च स एव ईश्वरः किं प्रपञ्चस्य उपादानकारणमपि विवक्ष्यत उत निमित्तकारणमात्रम् ? आद्यपक्षो न नैयायिकसम्मतः, द्वितीये तु पक्षे निमित्तमात्रमीश्वर इति किं प्रत्यक्षेणावगतमुतानुमानेन ? नाद्यः, ईश्वरस्य परोक्षत्वात्, न द्वितीयः, ईश्वरो निमित्तकारणमित्यत्र कस्यापि हेतोरभावात् । आद्यकार्यं सकर्तृकम् कार्यत्वात् घटवत् इत्यनुमानन्तु न ईश्वरो निमित्तकारणमात्रमित्यत्र प्रमाणम्; इदं हि अनुमानम् आद्यकार्यं नानाकर्तृकत्वम् कार्यत्वात् प्रासादादिवत् इत्यनुमानेन सत्प्रतिपक्षितम् ।

तर्काप्रतिष्ठानसूत्रात् श्रुत्यनुगृहीतस्यैव तर्कस्य अलौकिकधर्मे ईश्वरादिसत्त्वे प्रामाण्यम् । श्रुतिस्तु ईश्वरं निमित्तमुपादानं च बोधयति 'तदैक्षत बहुस्यां प्रजायेय' इत्यादिरिति न परमाणुकारणवादोऽयं युक्तः ।

उपादानत्वञ्चेश्वरस्य न स्वतः प्रपञ्चाकारेण परिणामित्वेन । नहि ब्रह्म निरवयवं परिणमितुं शक्नोति । किन्तु परिणममानमायाधिष्ठानत्वेन । मायाधिष्ठानत्वञ्च ब्रह्मणो मायाऽऽवृतत्वरूपमेवेति विवर्त्तोपादानकारणं ब्रह्म पर्यवस्यतीति असत्कार्यवादोऽयं सम्यक् विमृश्यमानः सद्विवर्त्तवाद एव पर्यवस्यति । 'मायान्तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' । 'स मायी सृजते विश्वम्' इत्यादिश्रुतिस्मृतयश्च मायापेक्षमेवेश्वरस्य कर्त्तृत्वमिति बोधयन्त्य ईश्वरविवर्त्तोपादानत्वमेव समर्थयन्तीत्यद्वैतिनो मन्यन्ते । पाशुपतपाञ्चरात्रादिसिद्धान्तानुसारि-

यत्तु प्रकृत्यपेक्षेऽपीश्वरस्य कर्तृत्वं ईश्वरो निमित्तकारणमात्रं नोपादानकारणमपीति मन्वाना अपि उक्तश्रुत्युपपत्त्यर्थं परमाणुकारणवादमभिवदन्ति ।

यत्तु विपाकापेक्षमदृष्टं तज्जीवनिष्ठमेव नत्वीश्वरनिष्ठम् । यागादिजन्यमपूर्वं हि यागादिकर्त्रात्मनिष्ठम् । जीवाधिष्ठितमप्यदृष्टं प्रलये जीवस्याचेतनत्वात् न चेतनाधिष्ठितं भवतीति पूर्वमेवोक्तम् । पाशुपतादिमते तु प्रलयेऽपि जीवस्य चेतनत्वाच्चेतनाधिष्ठितादृष्टापेक्षं मायापरिणामकर्तृत्वं यद्यपि सम्भवति नैयायिकमते तु कथमपि न परमाणुक्रियाकर्तृत्वं सम्भवति ।

अस्तु वा कथमपि परमाणुषु क्रिया तथापि तयोः संयोगो न सम्भवति, सावयवयोः खलु संयोगः नच परमाणू सावयवौ । एकस्मिन्देशे संयोगो देशान्तरे चासंयोग इत्यव्याप्यवृत्तिः खलु संयोगः प्रतीयते । अत एव वस्तुद्वयप्रतीतिरपि । सर्वात्मना संयोगे हि वस्तुद्वयमप्येकात्मना प्रतिभासेत यदि निरवयवेऽपि संयोगोऽभ्युपपद्येत तर्हि वस्तुद्वयप्रतीतिरेव न सम्भवेत् । एवञ्च परमाणुष्वात्यन्तिकसंयोगाङ्गीकारे संयोगानामप्युपचयो न स्यात् । यदि परमाणवः सावयवाः स्युस्तर्ह्यनित्यास्ते समापद्येरन् । एतेन दिग्देशकालाद्यवच्छेदोऽपि परमाणूनामावश्यक इति सूचितम् ॥

किञ्च परमाणवो न प्रवृत्तिस्वभावा (न सर्वदा परिणामशीलाः) प्रलयाभावप्रसङ्गात्, नाऽप्युदासीनस्वभावाः सृष्ट्यभावप्रसङ्गात्, नोभयस्वभावाः विरोधात् । यदि कदाचित्प्रवर्तन्ते कदाचिच्च निवर्तन्ते इत्यनुभयस्वभावास्तर्हि प्रवृत्तौ निवृत्तौ च निमित्तं वर्णनीयम् । तत्तु दृष्टमदृष्टम्वा न सम्भवति इति पूर्वमेव निराकृतम् ॥

स्पर्शवत्त्वं नित्यत्वञ्च विरुद्धमिति स्पर्शवन्तो नित्याश्च परमाणव इति मतं हेयमेव । कार्याणामनित्यत्वनिषेधार्थं किमपि नित्यं यद्यप्यङ्गीकरणीयं तथापि परमाणुनित्यत्वं नाङ्गीकरणीयम्, आत्मनित्यत्वेनापि तदुपपत्तेः । किञ्चावयवसंयोगसामान्यं कार्यद्रव्यमात्रम्प्रति कारणमुतावयवसंयोगः । आद्ये कपालद्वयसंयोगात् शरावादीनामुत्पत्तिप्रसङ्गः, द्वितीये विनाप्यवयवसंयोगं क्षीरादीनां दध्यादिरूपेण परिणामदर्शनमुपपन्नं न स्यात् । अत्र हि अवयवमात्रेण क्षीरं दध्यादिरूपेण परिणमति । घटघटिकादिप्रक्रिया अविद्यापरिणामत्वपक्षेऽपि सत्कार्यवादावपि सम्भवति, परन्तु सावयवमनित्यमेव त्रुट्यादिकमङ्गीक्रियते न परमाणवः 'तस्माद्वाकाशः सम्भूतः' इत्यादि श्रुतिराकाशात् वायोर्वायो-

रश्नेरश्नेरणां श्रद्धाश्च पृथिव्या उत्पत्तिं बोधयति । निरवयवानामपि परमाणूनां कल्पितेनावयवेन संयोगो न कार्यं जनयितुमलम् । नहि स्वप्नदृष्टैरिष्टकादिभिर्गेहप्रासादादीनां निर्माणाय प्रवर्तन्ते प्रेक्षावन्तः । सर्वथा परमाणुकारणवादो न युक्तः ॥

स्वकारणसमवायः कार्यस्योत्पत्तिरिति यदुक्तम् तदसङ्गतम् समवायसम्बन्धो ययोर्विवक्षितस्तौ समवायिनौ । तयोः समवायस्य च सम्बन्धो विद्यते न वा ? यदि विद्यते तस्यापि सम्बन्धः तस्यापि सम्बन्ध इत्यनवस्था । यदि न विद्यते तर्हि हिमवद्विन्ध्ययोरपि समवायित्वप्रसङ्गः । स्वरूपमेव समवायस्य सम्बन्ध इति न युक्तम् । स्वरूपं ह्यधिकरणं वा आधेयम्वा प्रतीतिफलम्वा प्रतीतिर्वा इत्यत्र विनिगमनाभावात् । समवायस्तु न स्वरूपमात्माश्रयापत्तेः । अतिरिक्तसम्बन्धस्य समवायस्वरूपसम्बन्धे त्वनवस्था । वस्तुतस्त्वप्रामाणिकोऽयं समवायः । तत्र हि इह तन्तुषु पट इत्यनुभवः प्रमाणमिति चेत् । नवायमनुभवः किन्तु तन्तवः पटः पटे तन्तव इति वाऽनुभवः । एतेन शाखासु वृक्ष इति प्रतीतिरपि परास्ता, वृक्षे शाखा इत्यनुभवस्य सर्वसाधारणत्वात् ॥

किञ्चायं समवायो न स्वतन्त्रपदार्थान्तरं आत्माकाशवदुपलब्धिप्रसङ्गात् । परतन्त्रश्चेत् यत्तन्त्रोऽसौ समवायस्तेन समवायस्य सम्बन्धो वर्णनीयः स च न सम्भवतीति पूर्वमेवोक्तम् । सम्बन्धस्यापि सम्बन्धः संयोगादिषु वर्तते अतः सम्बन्धत्वेन सम्बन्धानपेक्षावर्णनं न सम्भवति । सम्बन्धत्वेऽपि संयोगस्य गुणत्वमपि विद्यते । अतस्तस्य सम्बन्धोऽङ्गीकृत इति चेत्समवायस्य संयोगस्येव सम्बन्धत्वेनापि हेतुना गुणत्वमनुमीयताम् ॥

अयुतसिद्धत्वात्समवायो न गुण इति वदन्तष्टव्यः कथमयुतसिद्धिर्नाम ?— द्रव्यगुणयोर्भिन्नदेशस्थत्वेन हेतुना अयुतसिद्धत्वञ्चापृथग्देशत्वं नापि अपृथक्कालत्वम् सव्यदक्षिणयोर्विषाणयोरेककालीनयोरयुतसिद्धिप्रसङ्गात्, नाऽप्यपृथक्त्वभावत्वं द्रव्यगुणयोः पृथक्त्वभावात् । अतोऽपृथगुत्पत्तिरयुतसिद्धिरिति वर्णनीयं तच्च भवन्मते न सम्भवति द्रव्यगुणयोः पृथगुत्पत्तिस्वीकारात् । सम्बन्धित्वेनैव कार्यस्य कारणे समवायो नायुतसिद्धिः । तत्र सिद्धस्य कार्यस्य कारणेन सम्बन्धो वा ऽसिद्धस्य । आद्ये अयुतसिद्धत्वहानिः । उत्पत्तेः पूर्वमसतः कार्यस्य कारणे समवायासम्भवेन समवेतमेव कार्यमुत्पद्यत इति वर्णनमपि न सम्भवति । युगपदेव कारणे कार्यं समवायश्च भवतीति चेत् यदि तत्र कार्यं स्यात्तर्हि सत्कार्यवादः

यद्यसत्समवायायोगः । यदि न सत् नाऽप्यसत्कार्यं तर्ह्यद्वैतमतप्रवेशः । अद्वैतिनो हि ब्रह्मव्यतिरिक्तं सर्वमपि सदसद्विलक्षणमाविद्यकं च मन्यन्ते । एवञ्च समवाये नित्यतापि परास्ता । सम्बन्धिविनाशो यदा भवति सम्बन्धोऽपि तदा विनश्यति । एवञ्च कार्यकारणयोरभेद एवाङ्गीकरणीयः । अभेदेऽपि कार्यकारणयोर्व्यवहारभेदोऽवस्थाभेदनिबन्धन एव नतु स्वरूपभेदनिबन्धनः । दृश्यते बालाद्यवस्थाभेदेनैकस्यैव देवदत्तस्य बालो युवा स्थविर इति व्यवहारः । स्वगतविशेषापेक्षया मनुष्यो ब्राह्मणः श्याम इति, स्वगतक्रियाभेदेन च श्रोत्रियः पाचक इति व्यवहारभेदो दृश्यते । कारणगतावस्थाविशेषाश्चेमे अनिर्वचनीयाः ॥

एकैव रेखा स्थानभेदेन निविश्यमाना शतसहस्रादिशब्दधीहेतुरिति प्रत्यक्षमस्माकम् । एतेन सम्बन्धभेदोऽपि परास्तः एक एव सम्बन्ध एकदेशव्याप्त्या संयोग इति, आत्यन्तिकव्याप्त्या समवाय इति च कल्प्यते । एवञ्च गुणकर्मसमवायाश्रयोऽपि द्रव्याभिधाः । गुणादीनां द्रव्याभेदेऽपि द्रव्यपदेन गुणस्य न व्यपदेशः निष्प्रयोजनत्वात् तथाहि पृथिव्यप्तेजोवाय्वाकाशात्ममनसां द्रव्यत्वाङ्गीकारो न द्रव्यपदेन तेषां लोके व्यवहारसिद्ध्यर्थम् । लोके द्रव्यपदेन धनमेव व्यवह्रियते नापि द्रव्यत्वज्ञानेन मोक्षो भवति । नहि पृथिव्यादिकं द्रव्यतया जानन्तः सर्वेऽपि नैयायिका मुक्ताः । वस्तुतस्तु पृथिव्यादीनां पदार्थान्तरत्वकल्पनेन विपर्ययज्ञानमेव बहुविधं सम्पद्यते । अतो द्रव्यं नाम न पदार्थान्तरं किन्तु नाममात्रम् (वाचारम्भणम्) गुणोऽपि घटादिनाममात्रमेव, श्यामत्वादिना तु वर्त्यमानघटादिः रूपपदार्थः, क्रिया तु कर्मपदार्थ इति नामरूपक्रियात्मकं दृश्यं जगदेवात्मेति व्यवहारे पदार्थद्वयं विद्यते । परमार्थगत्या तु सर्वस्यापि दृश्यस्याविद्यकत्वात्तत्त्वज्ञानेन समूलं विनाशेन आत्मैव वस्तुसत् एतेन सत्तासामान्यमपि व्याख्यातम् । द्रव्यत्वादिकमपरसत्ता द्रव्यादिमात्रवृत्ति, द्रव्यगुणकर्मत्रितयवृत्तिसामान्यं परसत्तेति नैयायिका मन्यन्ते । नहीदं सङ्गतम्–द्रव्यादीनामभावे तत्सामान्यकथाया अप्यसम्भवात् । नित्यद्रव्यमेव द्रव्यान्तरात्स्वस्य स्वतो व्यावर्तकं भवतीति विशेषपदार्थोऽपि नाङ्गीकरणीयः । प्रतियोग्यप्रसिद्ध्या अभावपदार्थोऽपि नास्ति । एवञ्च सद्रूपे ब्रह्मणि कल्पितं सर्वमपि सदिव भासमानमपि वस्तुगत्या असत्यमेव मन्तव्यम् । 'सन्मूलाः सोम्येमा' इति श्रुतिरप्यत्र प्रमाणम् ॥

द्रव्यादीनां स्वतः सत्तावादस्तु न युक्तः । तथाहि द्रव्यमिवाभावमपि इदं इत्थं जानीमः । परासामान्यन्तु नैयायिकानां मते द्रव्यगुणकर्ममात्रवृत्ति

एवं च कथमभावः सद्रूपभासतामुपपद्येत ? अभावादिषु परम्परासम्बन्धेन सत्ता भासते द्रव्यगुणकर्मसु साक्षात्सम्बन्धेन सत्ता भासते इति कल्पनमप्रामाणिकम् । सम्बन्धभेदेन सत्ताप्रत्ययस्य कल्पनं हि प्रत्ययस्यैकरूप्ये न सम्भवति । एवञ्च सद्रूपस्य ब्रह्मण एवैकस्य सर्वत्र तत्तादात्म्येन भानमिति कल्पनायां सर्वमुपपद्यते । सन् घट इत्यनुभवोऽपि घटादीनां सदभेदमेव गोचरयति न तु सत्ताश्रयत्वम् । एतेन द्रव्यं सत् इत्यादिप्रत्ययोऽपि व्याख्यातः सर्वाभिन्नत्वाच्च सतः द्रव्यगुणादीनामपि सद्रूपेण परस्परमभेदः । एवञ्च द्रव्यगुणकर्मसु सत्त्वं नाम धर्मो न कल्पयितुं युज्यते किन्तु ब्रह्मधर्म एव सत्त्वम् ब्रह्मणि कल्पितेषु घटादिष्वपि भासत इत्येव कल्पनीयम् अतएव हरिकारिका (वाक्यपदीयम्):— 'सम्बन्धिभेदात्सत्तैव भिद्यमाना गवादिषु । जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिता ॥ तां प्रातिपदिकार्थञ्च धात्वर्थञ्च प्रचक्षते । सा नित्या सा महानात्मा तामाहुस्त्वतलादयः ॥ शास्त्रे तु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते । समारम्भस्तु भावानामनादिब्रह्मणो मतः' ॥ इति एकैकेन्द्रियग्राह्यस्य पदार्थस्य चाक्षुषतायामेव रूपं कारणम्, न तु सर्वेन्द्रियग्राह्यस्य चाक्षुषतायाम् । ब्रह्म तु सर्वेन्द्रियग्राह्यमिति नीरूपमपि ब्रह्म काल इव चाक्षुषप्रत्यक्षविषय इत्युक्तमेव । 'न सोऽस्ति प्रत्ययो लोके यत्र कालो न भासते' इति मीमांसकवचनम् । 'न सोऽस्ति प्रत्ययो लोके यत्र सत्ता न भासते' इत्यस्मत्पूर्वाचार्यवचनञ्चेदानीमुपपद्यते । इदानीं घट इति प्रतीतिर्देशकालमवगाहते । सच कालः परमातिरिक्तो मायानन्तर्गतश्च । न ह्यात्मा न वा मायेति नैयायिका वदन्ति । 'देश एव काल' इति शिरोमणिभट्टाचार्या वदन्ति । मायाचित्सम्बन्धः काल इति तदेकदेशिनः सर्वथा ब्रह्मव्यतिरिक्तस्य सत अप्रसिद्धा ब्रह्मण एव सतः कारणत्वमित्यङ्गीकरणीयम् । तच्च कारणत्वं ब्रह्मपरिणामत्वेन न सम्भवति तदनित्यत्वापत्तेः इति तद्विवर्त्त एव सर्वोऽपि प्रपञ्च इत्यसत्कार्यवादो न सङ्गतः ।

साङ्ख्यास्तु सत्त्वरजस्तमोगुणात्मकमिदं सर्वं कार्यजातमिति वदन्ति । दृश्यते हि एकस्यैव वस्तुनो दर्शनेन एकस्य सुखं, अन्यस्य दुःखं, अपरस्य मोहश्च भवतीति । इदञ्च सत्त्वरजस्तमोगुणात्मकं किमपि कारणं कल्पयति । तदेव कारणं प्रकृतिपदेन प्रधानपदेन च व्यपदिश्यते । नहि ब्रह्म परमाणवो वा जगत उपादानकारणम् अनवयवत्वात् । तथा च सत्कार्यवाद एव युक्त इति साङ्ख्या वदन्ति ॥

सत्कार्य्यवादो नाम :-सत एव कार्य्यस्य अनभिव्यक्तस्य सामग्रीविशेषैरभिव्यञ्जनमेव नतूत्पादनम् । यथा तिलेषु विद्यमानस्य तैलस्य आविर्भावमात्रं नतूत्पादनम् । अन्यथा असत उत्पादने सिकताताेऽपि तैलमुत्पद्येत । 'अजामेकां लोहितशुक्लकृष्णां, बह्वीः प्रजाः जनयन्तीं सरूपाम्, अजोह्येकोजुषमाणोऽनुशेते, जहात्येनां भुक्तभोगामजोऽन्यः' इति श्रुतिरपि प्रधानपरिणामवादमेव ज्ञापयति । अतएव 'नासतो विद्यते भावो नाभावो विद्यते सत' इति स्मृतिरप्युपपद्यते ।

यथा वत्सविवृद्ध्यर्थं क्षीरमचेतनमपि स्वयमेव वर्द्धते यथाऽनिलोऽचेतनोऽपि लोकोपकाराय प्रवर्त्तते एवं पुरुषभोगमोक्षार्थमचेतनमपि प्रधानं प्रवर्त्तयति इति युक्तम् । यथानिर्व्यापारोऽप्ययस्कान्तः सन्निधानमात्रेण लोहं व्यापारयति एवं निर्व्यापारोऽपि पुरुषः सन्निधिमात्रेण प्रधानं व्यापारयतीति युज्यते । एवं च प्रधानपुरुषसंयोगनिमित्तः प्रधानपरिणाम इति युक्तमेव । प्रधानपुरुषयोः सम्बन्धश्च पङ्ग्वन्धयोरिव परस्परापेक्षया युज्यते । प्रधानं हि भोग्यतया भोक्तारमपेक्षते, भोक्तापि भोग्यमपेक्षते इति परस्परापेक्षणम् । अथवा भोक्ता पुरुषः भेदाग्रहात् बुद्धिच्छायामापन्नः तद्धर्माध्यात्मिकादित्रिविधदुःखं परिहरन् कैवल्यमपेक्षते ।

ब्रह्माण्डे किं नाम वस्तु बृहत् ?

मदीयवास-भवन–सन्निधाने कश्चन विष्णुभक्तिपरायणः कौपीनवान् महात्मनः प्रतिवसति स्म । आसीत्तस्य धर्म्मसंलापे धर्म्म्यैकर्म्माचरणे च अतिमहती सम्प्रीतिः । अनुदिनमेव स वैष्णवो मदन्तिके धर्म्मालापं कुर्व्वन् शृण्वंश्च धर्म्मव्याख्यां प्रीतमनाः समजायत । इत्थं स ममापि श्रद्धाभाजनतामगात् । परीक्षाच्छलेन च स प्रायश एव मां धर्म्मविषयकान् कूटप्रश्नान् अपृच्छत् । तस्य हि सरलचित्तस्य मनसीयमेवासीदतिदृढा प्रवृत्तिर्यदहमेवास्मिन् तत्र प्रदेशे सुपण्डितो धर्म्माधर्म्मविचारनिपुणश्च । मम संस्कृतभाषाध्ययनमेव तस्यैतादृशो विश्वासस्य कारणमिति मे प्रतिभाति । मया खलु श्रुत्वा तस्य प्रश्नपद्धतिं कदाचित् श्रीमद्भागवतात् कदा वा हरिभक्तिविलासात्, कदापि वा ब्रह्मवैवर्त्तपुराणात्, विष्णुपुराणात्, चैतन्यचरितामृतात् वा श्रीकृष्णचरितामृतं धर्म्मस्य रहस्यं च तस्मै यथाशक्ति वर्ण्यते स्म । सोऽपि तयैव वर्णनया परितृप्तकर्णः श्रीविष्णु-करुणार्णवे स्नात इव, श्रीश्रीवैकुण्ठधामगत इव, श्रीश्रीराधानाथ–चरण–कमल-

परिमलं पीत इव स्मेराननो निमीलितनयनश्चानन्दविस्फारितवदनमण्डलः भक्तेः पराकाष्ठामिव प्राकटयत् ।

एकदा तु अस्ताचलमुपागते भगवति विभावसौ श्रीकृष्णस्य पदयुगल इव लोहितायमाने पश्चिमदिङ्मण्डले, तस्यैव श्यामकाय इव श्यामलतामधिगतासु पश्चिमदिग्वधूषु कृष्णकलेवर-विलिप्तचन्दन इव समुज्ज्वलति सुनीलनभस्तले नक्षत्रमण्डले स वैष्णव ईषद्विहसितविकसिताधरः समाप्तसन्ध्यावन्दनस्य मम समीपमाजगाम । आगत्यैव स यथारीति प्रणम्य श्रीकृष्णनामोच्चारणपूर्वकं मामपृच्छत् 'प्रभो ! अद्य खलु प्रश्नेनैकेन महता भवन्तं निरुत्तरं विधास्यामि ।' मयोक्तं नास्त्यत्र भक्त विचित्रं किमपि, जगदिदं खलु भ्रान्तिमत्, मुनीनामपि भवति सर्वदा मतिभ्रान्तिः 'किं पुनः क्षुद्रबुद्धीनां मादृशानाम् । भवतु तत्, सम्प्रतुमासनपरिग्रहेण प्रस्तूयतां भवतः प्रश्नः, सन्तोष्यतां च सन्देशसुधावर्षेण सोत्कण्ठितचकोरको नः । इत्थं मया साग्रहमनुरुद्धः स मामपृच्छत् कथयतु भवान् किं नाम वस्तु ब्रह्माण्डे बृहत् ?

आकर्ण्य चैतद् मया क्षणं विचिन्त्य प्रोक्तं भो वैष्णवप्रवर ! अद्य किल विहाय शास्त्रग्रन्थनिबद्धानि वचनप्रमाणानि प्रणालीभिरभिनवाभिर्भवत् प्रश्नोत्तरं प्रदास्यामि । श्रूयतां मम वचनम् । प्रथमतश्चिन्त्यताम् ब्रह्माण्डेऽस्मिन् भूमिभाग एव भवता बहुशः परिदृश्यते । वस्तुतस्तु पुराणेतिहासादौ भूगोलविज्ञानादौ च प्रमाणीकृतं यद् भूमिभागाज्जलभाग एव ब्रह्माण्डे बृहत्तरः । जलराशिरेव जगत्यस्मिन् सुविशाल इत्यर्थः । ततःपरमपि स्मर्य्यतां तपोधनस्यागस्त्यस्य समुद्रशोषणव्यापारः । अत इदमेव प्रतीयते, स खलु विशालो जलराशिरगस्त्येन पीतः स जलराशिस्तस्मात् स्वल्पतर एव । अतोऽगस्त्यस्यैव महत्तरत्वं विज्ञायते । अगस्त्यः खलु स्वर्गलोके प्रतिवसतीति श्रूयते । अतः आधारः स्वर्गः, आधेयश्च अगस्त्यः । नहि कदाचिदपि आधारापेक्षया आधेयस्य बृहत्तरत्वं सम्भवति, अत आधेयादगस्त्यादाधारःस्वर्ग एव बृहत्तर इति सुष्ठु संगच्छते । अतोपि भवत्प्रश्नस्य विशेषो विद्यते । निरुद्वेगं श्रूयताम् । भगवतो नारायणस्य पञ्चमावतारवृत्तान्तो भवतो विदितविषय एव । स खलु भगवान् धृतवामनरूपः दानवराजस्य बलेर्दर्पभङ्गकाङ्क्षया त्रिभिः पादैः त्रिभुवनमाचक्राम । एकेन पादेन भूः, अपरेण भुवः, तृतीयेन च स्वर्लोकस्तेनाधिकृत आसीत् । अतश्च भगवतो नारायणस्यापारमहिमवतः श्रीचरणान्येव विशालाद् विशालतराणीति मन्यामहे ।

एवाऽपि युक्तिर्हे भक्तप्रवर ! तत्त्वतो न रमणीया, यतो भगवतश्चरणानि तस्यैवावयवभूतानि । नह्यवयवा अवयविनमतिक्रमितुं शक्ताः अतोऽवयवी स्वयं भगवान् अवयवेभ्यस्तेभ्यस्तेभ्यः करचरणादिभ्यः सुतरामेव बृहत्तरः । स खलु भगवान् आधेयस्वरूपो यत्र यत्राधारे प्रतिवसति स आधार एव निर्व्विवादं ब्रह्माण्डे बृहत्तमः । भगवान् किल भक्त्यधीनो भक्तानां हृदासने स्वकीयं स्थानं कल्पयति, चरणकमलानि च तस्य भक्तानां हृदयकासार एव विकाशयति अतस्त्रिभुवनादपि विशालानामाधेयभूतानां भगवतश्चरणसरोजाना माधारीभूतभक्तचित्तकासार एवास्मिन् नश्वरे संसारे अविनश्वरतया सर्व्वस्मादेव वस्तुभूताद् बृहत्तमः । भक्तहृदयं खल्वाकाशादपि विस्तृतं, समुद्रादपि सुगभीरं, तुङ्गशृङ्गाद् महीधरादपि समुन्नतं, सौरकरराशितोऽपि दीप्तिमत् । किं बहुना नास्ति ब्रह्माण्डेऽस्मिन् भक्तहृदयतुल्यमपरं किञ्चिद् महद् बृहद् वा वस्तु । अतएव हि भगवान् विहाय स्वर्गलोकं वैकुण्ठधाम गोलोकधाम एव सन्ततं भक्तहृदयासनमधितिष्ठति ।

स्वर्गगामिनामपि पुण्यवतां जनानां पुण्यक्षये पुनःपतनसम्भावना विद्यते, पुनर्जन्मलाभश्च । तथाचोक्तं ।

"क्षीणे पुण्ये मर्त्त्यलोकं विशन्ति ।"

क्षीणे पुण्ये विशन्त्येतद् मर्त्यलोकञ्च मानवाः ।" इत्यादि श्रीविष्णोरासनभूतस्य भक्तहृदयस्य नश्वरत्वं न कदापि सम्भवति । तस्माद्धि भक्तहृदयासनात् भगवतो न पतनाशङ्का ।

विष्णुभक्तश्च स वैष्णवायणीर्व्याख्यानमिदमवहितं समाकर्ण्य प्रेमाश्रुपरिपूरितलोचनयुगलः पुलकितकलेवरः गाढालिङ्गनेन मदीयकलेवरं सुचिरम् आबबन्ध । अपगते तु कतिपये मुहूर्त्ते तदालिङ्गनपाशाद्विमुक्तोऽहं तेन प्रोक्तः "प्रभो ! व्याख्ययानया भवदीयया दूरीभूता मे चित्तभ्रान्तिः अपगतं कालुष्यम्, तिरोभूतानि मम हृदयसञ्चितान्यज्ञानतिमिराणि, सिद्धमभीष्टम्, पूर्णो मनोरथः, अधिगतं मया प्रश्नस्य सदुत्तरम्, सञ्जातो मयि भक्तिरसः, अभिषिक्तं कलेवरं ममानन्दोदकवर्षेण, किं बहुना दूरीभूतो मे सन्देहसमवायः । इत्थं बहुधा निगद्य स निजभवनमभिप्रस्थितः, अहमपि प्राप्तावसरः यथाकालं शय्यातलमलंकृत्य पुनःपुनरचिन्तयम् अहो को वस्तुपतं ब्रह्माण्डेऽस्मिन् किं नाम वस्तु बृहदिति ।

व्यायामः ।

शरीरमाद्यं खलु धर्म्मसाधनम् । आत्मनो मङ्गलाकाङ्क्षा अस्माकं मुख्यं प्रयोजनम् । तन्मङ्गलं विधेयं निर्मलस्य मनस उत्साहवर्द्धनेन । न समुत्पद्यते तदपि स्थूलशरीरस्य स्वास्थ्यमन्तरेण । अतः शरीरेण सह मनसो नैर्मल्यं येनोपायेन उपचीयते तत् यथासाध्यं सम्पादनीयमस्माभिः ।

शरीरस्यापि समयोचितनियमेन बलपुष्टि-वर्द्धनं हि व्यायामः कथ्यते । तेन बले समुत्पन्ने नानाविधं मान्द्यं स्वतो नश्येत् । शरीरेण समं मनसः सम्पर्कात् (यतः शरीरं स्थूलशरीरं, मनस्तु सूक्ष्मशरीरावयवभूतम्) शरीरे सुस्थे मनोऽपि सुस्थं जायते । मनसः स्वास्थ्ये समुत्पन्ने जगदीशदत्तविवेकशक्त्या तेनैव मनसा श्रीमद्[illegible]तादिना स्वस्य परेषाञ्च मङ्गलं चिन्तयन् जनोऽल्पेनैव कालेन बहूनि फलानि अधिगन्तुं शक्नुयात् । तथा सति प्राणी स्वपरहितम् अनवरतं चिन्तयन् ऐहिकं निरर्थकं दुःखं सुखमप्यलीकं मन्यमानः तदर्थे सुखी वा दुःखी वा न भवति । येन च सकलदुःखनिवृत्तिपूर्व्वकं परमात्मध्यानजनितं नित्यसुखं समुत्पद्यते तदर्थमहरहः चेष्टेत । एवं सति जनः समष्टिरूपेण जगदपि ईश्वरमयं बुद्ध्वा सदा परोपकाराय यत्नशीलः भवति । परोपकाराय सतां विभूतिः, परोपकारश्च स्वर्गाय । संसाधिते च परोपकारे परमेश्वरः सन्तुष्यति ।

सर्व्वमङ्गप्रत्यङ्गादिकं नियमेन सञ्चाल्यमानं कर्म्मक्षमं स्यात्; यतः अतिसमर्थोऽपि लौहदण्डश्चालनाभावेन कलङ्कितो व्यवहारायोग्यो भवति, अति परिशुद्धमपि कूपजलं अव्यवहृतं पानयोग्यं न भवति, विदुषः विद्या चर्च्चाभावेन न लोकहितसाधनाय भवति, वक्तापि समित्यादौ किमपि न वदन् मूकप्रायो भवति, बलिष्ठोऽपि प्रतिदिनमङ्गचालनं अकृत्वा दुर्ब्बलो भवेत् । तथा मनसो वृत्तिः सदा रजस्तमोविवृद्धिद्वारेण कलुषिता भवति । एवं नृणां कलुषीभूते मनसि जगदपि अधोगतिं लभते । अतोऽस्माभिः सर्व्वैर्मिलित्वा अनवरतं शरीरस्य मनसश्च समुन्नतिसाधनाय शरीरस्य व्यायामः करणीयः । मनश्चापि नित्यशः सात्त्विके कार्य्ये विधिना नियोज्य क्रमशः तयोरुन्नत्या विविधसुखेन कालो यापनीयः ।

अयं खलु व्यायामः चरित्रस्य आत्मनिर्भरस्य च शक्तिं दृढयति । तेन च जनः इह परत्र च यशः कीर्त्तिञ्च विन्दति । परन्तु स्वास्थ्यहीनो जनः स्वजीवनकाले कार्ये साफल्यं कथमपि न लभते । अतः स्वस्य स्वसमाजस्य च प्रभूतमङ्गलस्यार्थं

साधयति। एतादृशो जनः अप्राप्ते वार्द्धक्येऽपि वृद्धो भवति। व्यायामस्य प्रयोजनीयता अतोऽस्माभिः अनायासबोध्या खलु।

व्यायामेन शोणितसञ्चालनक्रिया द्रुततरं भवति, अशित जीर्णकारिणी शक्तिश्च वर्द्धते। प्रत्युत व्यायामेन विना जड़ाः भवेयुः सकलाः शरीरस्थाः शिराः प्रशिराः। शरीरस्य मनसश्च समता हीयते। व्यायामो हि नरं सजीवं सतेजस्कञ्च करोति।

सर्व्वस्मिन् देशे महाजनै र्व्यायामस्य उपकारिता स्वीक्रियते। परन्तु दौर्भाग्यात् साधारणोऽयं जनः व्यायाममनुचितं मन्यमानः तम् अवजानाति। विशेषतोऽस्मिन् भारतवर्षे मानसिकपरिश्रमं प्रति यावान् स्तियत्नः, शरीरं प्रति तस्य शतांशानामेकतमोऽपि नास्ति; परन्तु यदि वयं स्वस्य स्वसमाजस्य च मङ्गलं काङ्क्षामः तदा व्यायामोऽस्माकमवश्यमाश्रयणीयः।

यादृशैः व्यायामैः सकलम् अङ्ग प्रत्यङ्गं परिचालितं भवति तादृशाः व्यायामा अत्युपकारिण इति सम्पादनीयाः। मुद्गरक्रीड़ा, अङ्गस्फारणं, सन्तरणं, द्रुत-धावनम् अश्वारोहणम् अपरे च अस्मद्देशीयाः व्यायामाः"। कन्दुकानाम् उत्क्षेपणाप्रक्षेपणादिकं काष्ठमवलम्ब्य अङ्गावक्षेपणादिकं करचरणाद्यैः कन्दुक-क्रीड़नमित्यादयः पाश्चात्या व्यायामाश्च। मल्लक्रीड़ा पारस्यभाषया कुस्तिरिति अभिधीयते। परिष्करणेन कोमलमृत्तिकया सज्जितायाम् षष्टिवर्गहस्तपरिमि-तायां भूमौ इयं क्रीड़ा क्रियते। कदाचिदपि जयाकाङ्क्षाकृष्टस्य वीरस्य परा-जयकाले क्रोधः समुत्पन्नः अनिष्टं साधयति। क्रीड़ाया उपकारतुलनया अतीवाकिञ्चित्करः अयमपकारः। अनेन व्यायामेन शरीरस्थानां पेशीनां दृढ़तया बलोपचयः स्यात्। तेन चोपचीयते मानसिकं बलमपि।

नावगण्यते नीचतया सन्तरणमपि व्यायामेषु। अनेन सकलमपि अङ्ग-प्रत्यङ्गम् चलति। अस्य सम्पादनेन स्वल्पएव सहसा धर्म्मोत्पादनेन शरीरस्य अवशता मनसोऽच विरक्तिश्च न घटते। प्रत्युत इह शीतलजलसम्पर्कात् शरीरस्यावशता नश्यति वचोऽपि स्फायते।

अवर्षणकाले तृणाच्छन्नभूमौ शीतलवालुकादौ वा व्ययधावनं शरीरस्य प्रभूतां स्फुर्त्तिं साधयति, वर्द्धते च विस्पष्टता कण्ठस्वरस्य। प्रायशो बालकाः "हाडुडु" नाम्ना ख्यातां श्वासावरोधिकां क्रीड़ां कुर्वन्ति। क्रीड़ेयमायुषः मनसश्च स्थिरतादायिनी, बुद्धिं वर्द्धयति। ईदृशी क्रीड़ा समतलभूमौ सुखेन सम्पाद्यते।

इयं इतराभ्यः क्रीडाभ्यः उत्कृष्टतरा बाह्यम् आन्तरञ्च सुखम् उत्पादयति, बाधाप्यत्र न समुत्पद्यते; दर्शकोऽपि सुखेन पश्यति, नात्र जनानाम् अर्थव्ययः समयहानिश्च संजायते ।

काष्ठमयस्तम्भस्य शरीरोत्क्षेपणावक्षेपणरूपो व्यायामः 'आंग्ल' भाषायां "जिम्नास्टिक" इत्यभिधीयते । आदौ तावत्पुरा 'यीस' देशे अस्याविष्कारोऽभूत् 'यीक्' भाषायाम् अनावृतोऽस्यार्थः । यीक्सभ्यतानुगामिभिः रोमदेशीयाः जना अपि एतत्क्रीडाप्रिया अभूवन् । कियन्तं कालं यावत् अस्याः क्रीडायाः अस्तित्वलोपो जातः । ततः पाश्चात्ययुद्धाविष्कारेण सह अस्या पुनरुद्धारोऽभूत् । अङ्ग्लशासकस्य 'क्याम्पबेल' महोदयस्य शासनसमये भारतीयविद्यालयसमूहे अस्याः प्रतिष्ठाऽभवत् । अनया क्रीडया शरीरस्थानि पेशीवृन्दानि दृढानि कार्य्यक्षमाणि च भवन्ति । बहुशः स्वास्थ्यवृद्धिश्च जायते । अस्मिन् खलु दुर्घटनाशङ्का वर्त्तते । ततोऽस्मिन् अवधानपरत्वमतीव अपेक्ष्यते । बहुशः अस्याः सन्तरणसादृश्यात् स्थलसन्तरणमिति अभिधीयते ।

काष्ठाविना कन्दुकानामुत्क्षेपणावक्षेपणादिकम् आङ्गलभाषायां 'क्रीकेट' नाम्ना कथ्यते । अष्टादशशताब्दीप्रारम्भे इंगलण्डदेशे अस्या आविष्कारोऽभवत् । प्राचीनातोऽधुनातनी क्रीडा सुपरिमार्ज्जिता । इंगलण्डदेशे ग्रीष्मर्त्तौ एषा क्रीडा विधीयते । अपेक्ष्यन्ते चात्र द्वाविंशतिसंख्यकाः क्रीडकाः । भारतवर्षे तु शीतर्त्तौ इयं जनैरनुष्ठीयते । अनेन व्यायामेन शरीरस्फूर्त्तिर्भवेत् बुद्धिवृत्तिरपि सुपरिमार्जिता स्यात् ।

यष्टिसाहाय्येन कन्दुकोत्क्षेपणावक्षेपणं आङ्गलभाषायां "हकि" इति नाम्ना ख्यायते । १८८६ खीष्टाब्दे क्रीडेयमाविष्कृता । भारतवर्षे शीतेऽस्य प्रारम्भो ग्रीष्मे चावसानं भवति । दक्षता अस्यामतीवापेक्ष्यते । लक्ष्यदृष्टिरत्र दृढतां प्राप्नोति इत्येतत् एतस्य विशेषत्वम् ।

करचरणाविना कन्दुकक्रीडनं अतीव चित्ताकर्षकम् । अस्मद्देशे वर्षासु एतत् क्रीड्यते । पाश्चात्त्यापरक्रीडावत् एतत् विमुक्तसमतलप्रान्तरे भवति । अस्यां प्रफुल्लता यथेष्टं जायते मानवानाम् ।

फलतोऽत्र द्रष्टव्यं यत् पाश्चात्यव्यायामाः मुक्तनिर्म्मलवातपरिपूर्णप्रान्तरे क्रियन्ते, तासु च क्रीडासु बहुक्रीडकाः समन्विताः भवन्ति । ते व्यायामाः क्रीडाकाले दर्शकानाञ्चानन्दं बहुशः वर्द्धयन्ति । प्राच्यव्यायामेषु कतिचित् आङ्कु-

भूमौ क्रीडन्ति । स्वल्पाऽपि क्रीडकसंख्या । अतस्ते तादृशीमुत्फुल्लतां दातुं न शक्नुवन्ति । अन्यतो भारतीयव्यायामाः बलवृद्धिसाधने वैदेशिकव्यायामेभ्यः समर्थतराः परमत्र विरला खलु पाश्चात्यक्रीडावत् क्षतिसम्भावना । अत उभयकोटिरक्षणं परं हितकरम् ।

यथा अत्यधिकव्ययो जनं भिक्षुकादपि हीनं करोति, यथा अत्यधिकजलसेचनं वृक्षं नाशयति नतु वर्द्धयति, यथा अतिभोजनेन पाकस्थल्याम् पीड़ा जायते तथा अत्यधिकव्यायामेन शरीरं अवशं जड़ञ्च भवति । ततः स्वास्थ्यहानिः भवति नतु स्वास्थ्यलाभः ।

परन्तु अध्यवसायेन विना नरो न लभते काञ्चिदपि कृतकार्य्यतां । तथैव नियमितं व्यायामं विना साफल्यं न विन्दति जनः, प्रत्युत भूरिक्षतिर्भवेत् । ततः परिमितो नियमितश्च व्यायामः सर्वदा सर्वेषामनुष्ठेय इति शम् ।

जीवरामोपाख्यानम् ।

अस्ति हृदयपुराभिधाननगरे जीवात्मेव नित्यहरिदासः श्रीजीवरामनामा परमरमणीयः कश्चिद् द्विजशिशुः । तस्य योऽग्रजो मनोरमनामा, स आत्मनोऽपि वैश्यायमानो मन इव सततं विषयनिरतो जीवार्थसर्व्वचेष्टश्चासीत् । तस्य मनोरमस्य मोहिनी कामिनी चेतिनाम्न्यौ द्वे पत्न्यौ । ते चाविद्यास्मिते इव जीवद्वेषिण्यौ चन्द्रकरावृतरजन्याविव पिहितस्वरूपे कुरूपे अपि वसनभूषणादिभिः सुरूपे इव प्रतीयेते स्म ।

अथैकदा स मनोरमः "संसारस्योन्नतौ करणीयायां अर्थोपार्जनमवश्यकरणीयमिति विचिन्त्य वाणिज्याय यातुमिच्छन् अनुजं जीवमुवाच वत्स ! अर्थक्षयेण सीदामो वयं, तत् साम्प्रतं वाणिज्याय व्रज्यते, तद्ब्रूहि त्वदर्थे किमानेयमिति । जीवस्तु विवेकमिव हरिनामपरं शुकपक्षिणमेकमयाचत । ततः पत्न्यौ पप्रच्छ मनोरमः, युष्मदर्थे किमानेतव्यमिति । ते तु पापजातसुखजातमिवापातमनोहरं भङ्गुरं काचक्रीड़नादिकमयाचेताम् । ततः स पुनरुवाच पत्न्यौ प्रियतमे ! एष मे जीवनप्रतिमो जीवो युष्मत्करे समर्पितः । तदेनं मम भ्रातरं मातराविव प्रतिपालयतमिति तथेति ताभ्यां प्रतिश्रुतम् ।

ततः शुभेऽहनि इन्द्रियैरिव दशभिः किङ्करैरुपसेवितः षट्चक्रसमन्वितं शरीरमिव षट्कक्षं वहित्रमारुह्य विषयान्वेषणाय मन इव अर्थोपार्जनाय स मनोरमः प्राणप्रियतमं तमनुजमनुचिन्तयन् सुदूरं समुद्रपारं जगाम ।

अत्र तु कामिनीमोहिन्यौ कामरूपविद्याविदौ मन्त्रचालितवृक्षमारुह्य प्रतिनिशं निशाचरकामिन्याविव कामरूपं गन्तुमारेभाते। तत्र या नृत्यसभा वर्त्तते, तत्र योगदाने समनोयोगे द्वितयापि नृत्यगीतादिभिरेवातिवाहयतः स्म, जीवस्तु कथमपि जीवनयात्रां निर्व्वाहयामास।

एकदा चोषायां प्रबुद्धेन जीवेन कामरूपाद् भवनं प्रत्यागच्छन्त्यौ विलोक्य सुविशे ते भ्रातृदयिते उवाच आर्य्ये! निशायामेवं भवनाद् बहिर्गमनं कुलवध्वोर्भवत्योरन्याय्यमिति। ते तं दृष्ट्वा भृशं त्रपमाणे दत्त्वा किमप्यसत्यमुत्तरं सत्वरमन्तःपुरं प्रविविशतुः। तत्र च ताभ्यामनुमन्त्रितम्, विषदानेनायं शत्रुर्निपात्य इति। ततश्चापराह्णसमये समायाते, ससमादरं समाहूय मिष्टान्नविशेषमिषेण विषमाशयामासतुः। स च तदुल्वणहालाहलज्वालाकुलो विसंज्ञोमृतवद् [illegible] तं मृतं बुद्ध्वा "अद्य तावदेवं तिष्ठतु, रात्रौ दैवान्मृत इति श्वोऽस्य मरणं ख्यापयितव्यमि"ति निश्चित्य तं पर्य्यङ्के शाययित्वा निशायां तथैव कामरूपं जग्मतुः॥ ८

अथ श्रीभगवानुपागत्य भागीरथीसलिलेन सगरसुतानिव सगरं तममृतोदकेनाभ्यषिञ्चत्। तच्चामृतोदकं श्रीहरिनाम विषयमोहमिव तद्विषमोहमपगमयामास। ततः प्राप्तचेतनो जीवो नवाम्बुदसमप्रभं कमनीयतमं कमलायतविलोचनं विलोकयामास तं हरिम्। विलोक्यमान एव चान्तर्दधे श्रीभगवान् ततः सुप्तोत्थित इव जीव तद्हरिदर्शनं स्वप्नजमिति मन्यमानो हृष्टमना गृहाद्बहिराजगाम।

अस्मिन्नेव समये ससम्भ्रमं स्वं भवनं प्रत्यागच्छन्त्यौ ते वध्वौ दृष्ट्वा जीव उवाच आर्य्ये! पुनः पुनर्निषिध्यमाने अपि निशायां क्व पुनर्गतवत्यौ भवत्यौ? भवत्योरेतदन्यायाचरणमग्रजचरणे निवेदयिष्यामीति। ते तु 'कथं तावता विषेणापि नाम्रियतायम्? तत् किमयमस्मत्तोऽपि मन्त्रविदि'ति विस्मयमापन्ने मूकवद्गृहं प्राविशताम्। आगामिन्यां यामिन्यां कामरूपराजकन्याया विवाहोत्सवेऽभवत्तयोः सादरनिमन्त्रणम्। तत्र स्वयम्वरसभायां नृत्यगीतादिभिः समागतनृपतनयानां मनो रञ्जनीयमिति। तत्रावश्यगन्तव्यमिति विचिन्त्य मोहिनी प्राह जीवे जीवति कथमस्ति तत्र गमनसम्भावना। तदद्य रात्रावेवैष येन केनाप्युपायेन निहन्तव्य इति। अथ जगदानन्दकरमादित्यं जलधिजले विसृज्य सभासीनानां नृपाणामिव गगनवर्त्तिनां नक्षत्राणां पुरतो नृत्यन्तीव झिल्लीरवमुखरा

गायन्तीव रजनी विभीषिकया समं समायाता । ततस्ते निशायां प्रसुप्तं तं जीवं खण्डशश्चिच्छिदतुः, छित्वांश्च तान् रक्तमांसाद्यनुलिप्तान् अस्थिखण्डान् कुत्रचित् विजनारण्य इतस्ततो विकीर्य्य कामरूपं गन्तुकामे प्रसाधनाय भवनं पुनराजग्मतुः ।

अत्रान्तरे भक्तवत्सलः श्रीभगवान् जीवं निर्ज्जीवीकृतमालोक्य करुणाकुलः समागत्य तानस्थिखण्डान् संगृह्य तं पुनर्जीवयामास । जीवस्तु जीवित एव स्वप्नदृष्टं तमानन्दमयं सुहृदं पुनर्विलोक्य विपुलपुलकाकुलः सुशीतले तच्चरणकमलतले निपपात, उभाभ्यामेव हस्ताभ्यां तमुत्थाप्य श्रीभगवानुवाच । यक्षिणीभ्यां हतोऽपि त्वं प्राप्तोऽसि जीवितं पुनः ।

एहि जीव न विभीयाः आदेशं मम पालय ।

सर्व्वधर्म्मान् परित्यज्य मामेकं शरणं व्रज

अहं त्वां सर्व्वपापेभ्यो मोक्षयिष्यामि मा शुचः । इति

ततः श्रीभगवान् सजीवस्तयोर्यक्षिण्योर्वाहनवृक्षमभ्येत्यामन्त्रयत् ।

वनस्पते विधेहि त्वं श्रीजवदङ्कुरोद्गमे ।

द्विधा विभक्तमात्मानं साम्प्रतं वचनान्मम । इति ।

वृक्षश्च श्रीभगवदाज्ञया द्विधाविभक्तो बभूव । श्रीभगवान् जीवं तन्मध्ये संस्थाप्य वृक्षं पूर्व्वाकारं प्रापय्यान्तर्दधे ।

ततस्ते यक्षिण्यौ प्रसाधिते तत्रागत्यारुह्य तं वृक्षं चालयामासतुः । चालितो वृक्षो द्रुतं चलितुमारेभे । जीवश्च तन्मध्यस्थस्तयोर्मिथः संलापं श्रुत्वा भीतभीतः कृष्णाय राधिकावल्लभाय नम इति सस्मार । ततो वृक्षो मनोरथ इव क्षणेनैव संकल्पितं स्थानं प्राप । ते तु तस्मादवतीर्य्य नगमिव विराजमानं राजप्रासादमासादयेताम् । ततः श्रीभगवांस्तत्रागत्य स्थाणुस्वरूपं जीवं वृतादादाय तं भास्वन्मणिमौक्तिकादिभिरनेकविधं भूषयित्वा राजसभां प्रापितवान् । तत्र युगपदुद्यच्चन्द्रेण प्रभाकर इव श्रीभगवान् जीवेन सममुत्तमासनसमासीनः सुतरां रराज । अन्ये च ये राजानस्ते दिवसे खद्योता इव नितरां म्लानिमवापुः । ततः सपद्म इन्दीवरे भृङ्गावलिरिव सजीवे श्रीभगवति सर्व्वेषां नयनावलिर्निपपात । तत्र स्वयंवरसभायामविद्यास्मितयोर्गौरस्यमिव विश्वमुग्धकरं जन्मोहिनीकामिन्योर्नृत्यं संप्रवृत्तमासीत्; तत समन्तात् धन्यवादध्वनिलाभेन द्विगुणोत्साहमपि अप्रसादसं सत् सहसा विरतिं जगाम । ते च कोऽयं जीव इवाभाति, कथं स पुनर्जीवश्चिमं देशं समेष्यतीति विचिन्त्य उन्मनायमाने स्पन्दमानहृदये तालयमतिक्रम्य निपतच्चरणे पीडाव्याजेन ततः स्थानात् प्रस्थिते ।

अथ मूर्त्तिमती भक्तिरिव भक्तिनाम्नी राजनन्दिनी वरं वरिष्यमाणा देहप्रभया तं देशं समलङ्कुर्वाणा सखीभिः समागता श्रीभगवदिङ्गितेन जीवं वृतवती । ततोऽनुरूपपात्रे माल्यमर्पितमर्पितमिति समन्ताद् धन्यवादध्वनिविवर्द्धितशङ्खादिमाङ्गलिकशब्देन दिग्मण्डलं निनादितं बभूव । ततो यावदहमाह्वयामि तदैवागन्तव्यमिति श्रीभगवदनुशिष्टो जीवो राजनन्दिन्याः सखीभिः कौतुकागारं प्रापितः । तत्रार्द्धरात्रे प्रसुप्तेष्वशेषजनेषु श्रीजीवः त्वरितत्वरितमेहीति श्रीभगवतो वंशीध्वनिं शुश्राव । ततः स निद्राविवशां प्रियतमां राजपुत्रीं विलोक्य जातखेदोऽचिन्तयत् कथमिमां सुकुमारीं राजकुमारीं विहाय यास्यामि ? तत् साम्प्रतमेवं भवत्विति निश्चित्य कुट्टिमपतितेन कठिनीखण्डेनैकेन तस्याश्चेलाञ्चले चञ्चलकरं हृदयपुरधामा श्रीजीवरामनामास्मीति सुस्पष्टाक्षरं लिखित्वालेख्यगतामिव तां निद्राविवशाङ्गीं पुनःपुनर्विलोक्य राजभवनान्निष्क्रान्तः श्रीभगवदन्तिकं प्राप । श्रीभगवांश्च तस्यामेव निशायां तं हृदयपुरभवनं प्रापयामास । ततो रजनिरजनि प्रभाताऽपगता च मोहनिद्राभिभूतिर्जीवानाम् । ततो वन्दिभिरिव पतत्रिभिरभिष्टुतः, उपायनपाणिभिरिव सपुष्पफलपल्लवैस्तरुभिरभ्यर्चितः, पद्ममुखीभिः पद्मिनीभिः सप्रणयमीक्षितो गगनसिंहासनमारुरोह भगवान् सहस्रकरः । अस्मिन् प्रभातसमये ते मोहिनीकामिन्यौ कामरूपाद् भवनं प्रत्यागत्य जीवं सजीवं दृष्ट्वा महतीं भीतिमापतुः । ततो ज्येष्ठा मोहिनी प्राह नूनमेष एवं राजकुमारीमूढवान्, विमूढीकृते चावामप्यनेन मन्त्रविदा । अस्मत्स्वरूपमवगच्छतोऽस्य पुरतोऽस्मच्चातुरी चिरं न स्थास्यति । तत् किं करोमि, भवतु तावदेवमिति विचिन्त्य कस्यचिदज्ञातनामधेयवृक्षस्य मूलेन यन्त्रमेकं कृतवती । ततः प्रसुप्ते जीवे सा तच्छिरसि तं यन्त्रं बबन्ध । तेन स जीवः शुकनामा सुशोभनाङ्गो विहङ्गः समभवत् । ततस्तया करतालिकयोत्पातितः स संसारमवधीरयन् कृष्णाय राधिकावल्लभायनम इति सुधीरमुदीरयन् वृक्षाद् वृक्षान्तरं ग्रामाद् ग्रामान्तरं देशाद् देशान्तरं प्रययौ ।

अथ स पृथिवीं पर्य्यटन्नेकदा विमलापया सकमलकमलया सुदीर्घदीर्घिकयोपशोभितं नानावृक्षसमाकीर्णं पतत्रिकुलकुलायसङ्कुलं सकलरसानामेकीभावात् सकलरसं संसारस्याभिनवोद्यानमेकमागच्छत् । तत्र वत्सररूपिणा कालेनेव कालनाम्ना केनचित् किरातेन दिवसैरिव पञ्चषष्ट्यधिकत्रिशतसंख्यकैर्महद्वरैरुपेतेन विहङ्गमैरलक्षितं निभृतं दुरपासः पाशो योजितः । तत्र पतत्येव पतत्री करालकिरातक-

बलमाद् भवति । एष जीवविहङ्गोऽपि एकदा तत्र पतितः कालकिरातकरायत्तो बभूव । अथाखिललोकपालकः श्रीभगवान् गोपालकबालकवेशधरस्तत्रागत्य तं किरातमुवाच अरे किरात! नैव विहङ्गो हन्तव्यः । योऽसौ वहित्रपतिः समुद्र-तीरे वर्तते, स इमं मुद्रासहस्रेणापि क्रेष्यति । याहीमं विक्रीणीष्वेति । स तथेति वहित्रपतिमभिजगाम । स वहित्रपतिर्मनोरमः दयितेप्सितं द्रव्यजातं गृहीत्वा जीवेप्सितं तादृशं शुकपक्षिणं नाप्नोत् । ततः स्वयमुपागतं शुकविक्रयिणं तं किरातं मुद्रासहस्रेण सन्तोष्य तं शुकं गृहीतवान् । सच शुकरूपो जीवः स्नेहमयं तमग्रजं निरीक्ष्य तानि तानि दुःखानि संस्मरन् संवारितुमशक्यान् सुगुप्तमप्यसान्यश्रूणि विससर्ज । मनोरमोऽपि अनुजमुखदर्शनसुखमनुभवितुं भवनं प्रति चालयति स्म वहित्रम् । कतिपयैरेवाहोभिः स स्वभवनं प्राप । भवनमागत्य च पत्न्यौ पप्रच्छ जीवः क्व गत इति । ते ऊचतुः सोऽधुना व्यसनी संवृत्तः दुष्टबालकैः साकं क्व वसति, क्व तिष्ठति क्व भुङ्क्ते तच्चावां जानीवहे । योषिद्भ्यामावाभ्यां तदन्वेषणं कथं वा सुप्रापं भवेदिति । ततो मनोरमोऽनुजस्य सदिन्दुवदनं नावलोकयन् भवनं त्रिभुवनञ्च शून्यं निरीक्षमाणः उच्चै रुरोद प्रल-भ्रातः । एहि मम प्राणप्रियतम! क्वासि? एत्य मम नयनानन्दं विधेहीति । तस्यैवं क्रन्दनमाकर्ण्य तस्य शुकपक्षिणः प्रबलवात्याहतेनेव नयनजलधिजलेन धरणी प्लाविता बभूव ।

अथैकदा जीवेनोढा सा राजनन्दिनी अमात्यपरिजनैः परिवृता सुषुम्ना-सन्निहितद्वादशदलहृदयकमलकर्णिकान्तर्गतं जीवधामेव भागीरथीतीरोपकण्ठे द्वादशपल्लीपरिवृतहृदयपुरान्तःस्थले जीवधामाजगाम । आगत्य सा सपरिजना मनोरमं प्रणनाम । ततः केयमवगुण्ठनवतीति पृष्टोऽमात्योऽकथयत् महा-त्मन् भवदनुजेन श्रीमज्जीवरामेण नवोढामेनां राजनन्दिनीं विहाय तस्यां विवाहरात्रावेव कुत्रापि प्रस्थितम्, ततः प्रभाते सर्व्वं तद् राजकुलं शोकसमा-कुलं बभूव । राजा परं दुःखमापन्नो, रुरोद, राज्ञी चोपोष्य दिवा यामिनीं च यापयामास । इयञ्च राजदुहिता वृन्तच्युता लतेव मृतप्रायाभवत् । तस्मिन् दिवा न केनापि भुक्तं, तथा रात्रौ शयितम् । ततो हृदयपुरधाम्ना जीवरामनाम्नेति तल्लिखितं दृष्ट्वा चिरमनुसन्धाय प्रभूतपुण्येनाद्येय पतिगृहं प्रापिता । तद् गृह्यतामेवा पतिव्रता भ्रातृवधूरिति । एतदाकर्ण्य मनोरमो हर्षं विस्मयञ्चापन्न आसन्नातिथीनासनपाद्यादिभिः सम्पूज्य गृहलक्ष्मीं तां गृहमानिनाय ।

जीवार्थमानीतं तं शुकपक्षिणञ्च पत्युस्तवैव त्वयैव पालनीय इति तस्यै सबहुमानं प्रददौ । ततः श्वो वधूपाकस्पर्शो भवितेति ज्ञातिकुटुम्बादीन् निमन्त्र्य विविधान्नपानाद्यायोजनाय स्वजनान् नियोजयामास ।

अथ निशायां सा राजनन्दिनी एकाकिनी शयनकक्षमधिशयाना "क्वासि नाथ ! मामनाथां कुर्व्वाण इति रुरोद तां रुदतीं वीक्ष्य दूयमानमानसः शुकरूपः जीव उवाच प्रियतमे ! दयितोऽहमस्मि ते जीवस्य कर्म्मबन्धनमिव मच्छिरसि बन्धनमेकमस्ति, तत्त्वमुन्मोचयेति । साशु तदुन्मोचयामास । तेन सजीवः पूर्व्वरूपमवाप । ततो रूपधारिणमरूपमिवापररूपं तं निरूप्य सा सती रतिरिवात्यर्थं हर्षमापेदे । जीवश्च तद्बन्धनवृत्तान्तं सर्व्वमाख्याय तामालिङ्ग्य सर्व्वदुःखं विसस्मार । ततो निशावसाने स तदेव बन्धनमादाय पुनः शुकरूपो बभूव ।

ततः प्रभातायां रजन्यां सा राजनन्दिनी कृतस्नाना नवोदितमदिति-नन्दनमभिवन्द्य स्मृत्वा च मातरमन्नपूर्णां भक्तिपूतमानसा सहालिभिर्म्महानसं जगाम । तत्र सा रसवद्दशविधव्यञ्जनसहितानपरमान्नादिपाकं त्वरितं सम्पादयामास । ततो निमन्त्रितास्तैरमृतास्वादैर्व्यञ्जनादिभिः सन्तोषिताः सन्त आशिषा तामभिननन्दुः । एवमाशितेष्वशेषजनेषु स मनोरमो भोक्तुमुपविष्टः पार्श्वस्थितमन्यदासनं वीक्ष्य पप्रच्छ कस्येदमासनमिति । सा च राजनन्दिनी दासीमुखेनोवाच भवदनुजस्येति । स तच्छ्रुत्वा साश्रुनेत्र उवाच क्व मे जीवनाधिको जीवः ? क्व मे हारितं माधिक्ष्यमिति । ततः सा राजनन्दिनी शिरसस्तद्बन्धनमुन्मोच्य तं शुकरूपिणं जीवं पूर्व्वरूपं प्रापयामास । जीवस्तदा सजलनेत्र आगत्यानन्दाश्रूणि मुञ्चन्नग्रजं प्रणनाम । ततश्चाग्रजेन गाढमालिङ्ग्य सनिर्व्वन्धमनुरुद्धः स सर्व्ववृत्तान्तं निवेदयामास । ततः क्व ते पापिन्याविति सर्व्वत्र तयोर्म्मोहिनीकामिन्योरन्वेषणं प्रवृत्तम् । जीवं तथा प्राप्तरूपं निरीक्ष्यैव ताभ्यां स्वं स्वं द्रव्यजातं शिरसि निधाय तमालयं तं ग्रामं तं देशं विहाय कुत्रापि द्रुतं प्रस्थितम् । ततस्तयोरन्वेषणं कुत्रापि न लब्धम् । ततो मनोरमेणोक्तं भ्रातः ! तस्य तवापितुर्नामश्रवणेनाहमस्मि व्याकुलः । स कीदृशः, कीदृशं वा तस्य रूपं, तद्दर्शय इति । एतच्छ्रुत्वा जीवस्तत्र हृद्यहृदयपुरे श्रीराधामाधवयोर्म्मूर्त्तिं प्रकाश्य सानुजो भक्त्या सह तां सेवमानः सततमामोदमापद्यते स्म । प्रेमधिष्ण्यः श्रीकृष्णोऽपि सर्व्वाराध्यया श्रीराधया समं समेत्य चर्च्चितां तां मूर्त्तिमात्मसात् कृत्वा तत्स्थाने स्वयमधिष्ठितो बभूव । ततः प्रभृति तत् हृदयपुरं भूलोके गोलोकसतीर्थं तीर्थं प्रमतानि ।

तथैव जीवोऽपि हरिप्रसादादतीत्य मायां समवाप्य भक्तिम् ।
करोति तीर्थं हृदयं स्वकं तत् ददाति दृष्टं शततीर्थपुण्यम् ॥

इति श्रीजोषरामोपाख्यानं समाप्तम् ।

द्वैतवाद-वीरभद्रः ।

१७५ पृष्ठतोऽनुवृत्तः-द्वितीयांशः ।

यत्तु महेश्वरः करिष्यन्त्यवतारं स्वमित्युपक्रम्य वेदराद्धान्तसंस्थित्यै इति प्रतीक वचनं पुराण वचनमिति कृत्वा प्रभाकरेण समुद्धृतम् तद् निर्मूलम् ।

तस्य प्रामाणिकत्वेऽपि नाद्वैतवादस्तत्त्वं सिध्यति, तथाह्यत्र वेदराद्धान्तसंस्थित्यै इत्येतावन्मात्रमुक्तं, चोदनालक्षणोऽर्थो धर्म्म इति जैमिनीयसूत्रप्रामाण्यमङ्गीकुर्व्वता धर्म्मस्य वेदसिद्धान्तसम्मतत्वम् प्रकामेनापि वाच्यं प्रभाकरेण, यज्ञादिधर्म्मस्य वेदसिद्धान्तत्वेन शारीरकभाष्यकृतामपि सम्मतत्वात् तस्य संस्थितिरद्वैतमतमुपन्यस्य सौगतादिमतनिरसनेन यथा भवति तथोपपादितं प्राक्, अन्यथा कर्म्मोपासनज्ञानकाण्डसाधारणवेदशब्दमत्रानुपादाय 'वक्तुं वेदान्ततात्पर्य्यं'मित्येवाभिहितं स्यात् । यच्च "व्याकुर्व्वन् व्याससूत्राणि श्रुतेरर्थं यथोचिवान् श्रुतेर्न्यांय्यः स एवार्थः शङ्करः सवितानन:" इत्यानुपूर्व्वीकमनुक्तमूलं वचनमुपन्यस्तं तस्य चतुर्थचरणस्थपदार्थेन प्रथमचरणस्थपदार्थेनान्वयावश्यकतया दूरान्वयदोषप्रौढ्यै "सविता न स" इति नञ्पदार्थस्य तृतीयचरणस्थेन न्याय्य इत्यनेनान्वयो न रीतिविरुद्धत्वादुपेक्ष्यतामापद्यते, नापि तथाविधान्वयं विना "सवितानन:" इत्यस्य स्वरसतः-कश्चिदर्थः प्रतीयते; तथा च, नः अस्माकं सविता ईश्वरः शङ्करः शङ्कराचार्य्यरूपेणावतीर्णः व्याससूत्राणि व्याकुर्व्वन् व्याचक्षाणः श्रुतेरर्थं यथा ऊचिवान् श्रुतेः स एवार्थो न न्याय्यः किन्तु अर्थान्तरमपि इत्येवंकारेण लभ्यते, अयमेव तद्वचनस्य समुचितार्थः, न्याय्यः न्यायादनपेतः । न्यायो विचाराङ्गम् । तस्याख्ये विचारेऽपि द्वयोर्न्यायावतारस्यावश्यकत्वेन तदनपेतत्वादस्यार्थस्य सौगताद्यशिष्टमतनिरसनसामर्थ्यं सूचितम् । यद्यद्वैतं न वास्तवं तथापि तद्वादाय प्रवर्त्तिता अल्पः वेदार्थभूतयज्ञात्मज्ञानादितत्त्वसंरक्षणाय प्रभवति इति तन्मतादरः करणीयः । नत्वेतावता तदर्थस्यैव न्याय्यत्वं किन्तु न्यायादविशिष्टदर्शनसम्मतस्यार्थान्तरस्यापीति भावः । यदि सवितानन: इत्यंशः परित्यज्यते तथाप्युक्त एवार्थः पर्य्यवस्यति, अन्यथा न्याय्यपदवैयर्थ्यं श्रुतेः

स एवार्थ इत्यनेनैव चरितार्थत्वात्, न्याय्य इत्युक्त्वा विचारे नयसामर्थ्यमात्रं दर्शितं, स एव इत्येवकारस्तु स्वायोगव्यवच्छेदकः। न्याय्य इति नाम्नो वैयर्थ्यापत्तया तथाकल्पनाया एव युक्ततरत्वात्, न च न्याय्यत्वादेव वास्तवत्वम् अवास्तवे न्यायासम्भवादिति शङ्कनीयं, न्यायाभासेऽपि न्यायपदप्रयोगात् पञ्चावयवशब्दवत्, अद्वैतस्यावास्तवत्वेऽपि विचारविशेषे तत्पक्षस्य न्याय्यत्वसम्भवाच्च शून्यवादादिविचारावसरे दर्शितं हि न्यायाचार्य्यचरणैः उदयनपूर्व्वैश्चासौ सन्दर्भोऽस्माभिः। न च तस्य वास्तवत्वमेव तदभिमतमिति चिन्तनीयम् "एकस्य न क्रमः क्वापि" इति "परस्परविरोधे हि न प्रकारान्तरस्थिति"रिति च कुसुमाञ्जलौ "विरोधाविरोधयोः प्रकारान्तराभावा"दिति "अनुभवव्यवस्थितावनात्माऽपि स्फुरति इत्यवर्जनीयमेव"दिति "कः पुनरयं मोक्षः आत्यन्तिकी दुःखनिवृत्तिरात्मनः" इत्युपक्रम्य "शक्यश्चायं निर्व्वक्तुं"मित्या"दिति 'नित्यञ्च सुखं न सत्य"मिति चात्मतत्त्वविवेके स्पष्टमभिदधतां न्यायाचार्य्यपादानाम् अद्वैतमतप्रतीपतायाः सर्व्वैरेवाभ्युपगम्यमानत्वात् यतस्तावदद्वैतवादिनः" एकमेव ब्रह्म जगत् कारणं, सदसद् विलक्षणामविद्याम् अनात्मस्फुरणमन्तरेणापि ब्रह्मानुभवं मोक्षं चानिर्व्वच्यं नित्यविज्ञानानन्दलक्षणं" ब्रुवते। किञ्च "यथोचितात् श्रुतेर्न्याय्यः स एवार्थः" इत्युक्तं ननु "यथोचितात् श्रुतेर्न्याय्यः स एवार्थ इति, येनोक्तार्थस्यैव सर्व्वथा न्याय्यत्वं प्रतीयेत, अथ कोऽनयोर्भेद इति चेत् यथा येन प्रकारेण व्याससूत्रव्याख्यानवशायां श्रुत्यर्थमुन्नयात् तथा तेन प्रकारेण स एवार्थो न्याय्यः इति प्रकृतार्थः यथा शब्देन नित्यापेक्षस्य तथाशब्दस्याक्षेपात् स च प्रकारोऽद्वैतवादः व्याससूत्राणां व्याख्यानप्रकारभेदो वर्त्तते, तच्चाद्वैतपरतया व्याख्यातप्रकारे श्रुतेरद्वैतपरत्वमेव न्याय्यं, नतु द्वैतादिपरत्वं प्रकारान्तरेण व्याख्याने तु द्वैतादिपरत्वमपि न्याय्यं, विचारभेदे न्यायभेदस्य सम्भवादिति यथाशब्दघटितवचनतात्पर्य्यं; तस्माद् व्यक्त एव भावभेदः अतएव रामानुजादिबहुशिष्टसम्प्रदायविरोधो नास्ति, अन्यथा तद्विरोधेन तादृशवचनानां प्रमाणत्वस्यैव दुर्घटत्वापत्तिः, सम्प्रदायविशेषसम्मतत्वेन प्रामाण्यग्रहे तु सौगतादिमतस्यापि प्रामाण्यापत्तिः, नचैवं श्रुतेर्नानार्थकत्वकल्पने गौरवं तत्त्वोपदेशव्याघातश्चेति शङ्क्यम्, अद्यडदेतीत्यादिवत् प्रतीतिभेदमाश्रित्य तथोपन्यासात्, न पुनर्वाक्यवचनानार्थकत्वम्। अबाधितप्रत्यक्षाद्यनुरोधेन द्वैतार्थस्यैव वास्तवत्वात्, अतएव तृतीयपादे श्रुतेरिति यथे इत्यस्य च न वैयर्थ्यं, स इति तत्पदार्थेन प्रागुक्तयत्पदार्थान्वितश्रुत्यर्थस्यैव परामर्शादित्यपि यथा शब्दस्य यच्छब्दसमानार्थकत्वे दोषः, यथापदस्य प्रकारवाचित्वे तु नायं दोषः, प्रक्रान्त-

मात्रबोधकस्य स इत्यस्य व्यासादि परतया अपि सम्भवेन तद्वारणाय श्रुतिरर्थे इत्यस्योपादानात्, ननु प्रकारस्यैव न्याय्यत्वबोधनाय तद्वचनमिति चेन्न यतस्तथा सति 'स एव' इत्यत्र 'तथैव' इत्युपादीयेत, नोपादीयेत वा किञ्चित्, आक्षेपस्यापि सम्भवात् स इत्यस्य वैयर्थ्याच्च ।

'प्राचीनाभियुक्तनैयायिकानामपि परमार्थावस्थायाम् अद्वैतमेव मुख्यं तत्त्वं श्रुतितात्पर्यविषयतयाभिप्रेतम्" इत्याद्युपक्रम्य ये पुनर्न्यायाचार्यसंदर्भाः प्रभाकरेणोदाहृता स्ते त्वपव्याख्यानादिदूषितास्तावदुदाहर्त्तुरज्ञानबलीयस्त्वं प्रमापयन्ति, तथाहि "न ग्राह्यभेदमवधूय धियोऽस्ति वृत्तिः तद्बाधके बलिनि वेदनये जयश्रीः । नोचेदनिन्द्यमिदमीदृशमेव विश्वं तथ्यं तथागतमतस्य तु कोऽवकाशः" ॥ अस्यार्थः, ग्राह्यभेदं स्वातिरिक्तं विषयं विना ज्ञानस्य वृत्तिः विषयविषयिभावसम्बन्धो नास्ति, स्वस्मिन् स्वस्य तादृशसम्बन्धे मानाभावात् । तद्बाधके विषयबाधके बलिनि सति (नहि ज्ञानातिरिक्तं वास्तवं किञ्चिदस्ति इत्यादिरीत्या विचारेण यदि तद्बाधकं प्रमाणं बलीयः स्यात् तदा) वेदनये वेदान्तमते जयश्रीः जयलक्ष्मीः स्यात् इतिशेषः । पूर्व्वकल्पापेक्षया चरमकल्पस्य निर्द्दोषत्वं दार्शनिकसमयसिद्धं, तदिदानीमवतारयति नोचेदिति; यदि तुल्यबलं स्यात्, इदं प्रत्यक्षदृश्यमीदृशमेव कालान्तरेऽपि प्रत्यक्षसजातीयमेव अनिन्द्यं मिथ्यात्वेन निन्दितुमयोग्यं विश्वं तथ्यं स्वरूपतः सत्यं, तु पुनः तथागतमतस्य कोऽवकाशः? विज्ञान वादिनः सौगता बहिरर्थं न मन्यन्ते शून्यवादिनोऽपि न वास्तवमर्थं, तदभिभवनपद्यमिदं न्यायाचार्य्यपादानाम्, शाक्तनैगमस्त्वेत्थम्- "प्रविश वा अनिर्व्वचनीयख्यातिकुक्षिन्तिष्ठ वा मतिकर्द्दममपहाय न्यायनयानुसारेण नीलादीनां पारमार्थिकत्वे" अस्यार्थः अनिर्व्वचनीयख्यातिः अद्वैतवादिनाम्, भोः सौगत ! तत्कुक्षौ प्रविश वा, मतिकर्द्दमं बुद्धिमालिन्यमपहाय न्यायमतानुसारेण नीलादीनां पारमार्थिकत्वे तिष्ठ वा नीलादीनि पारमार्थिकानि स्वीकुरु वेति। यदि प्रपञ्चस्य मिथ्यात्वं स्वीक्रियते भवता तदा अद्वैतमतप्रवेशो बुद्धिमालिन्यात्, तदपहाने च न्यायमताङ्गीकारः, तत्र च नीलादीनां पारमर्थिकत्वं नत्वद्वैतिनामिव ब्रह्मण एव पारमार्थिकत्वं नैयायिकानां सम्मतमिति भावः । तथाच व्यक्ता भगवन्न्यायाचार्य्यपादपङ्क्तिः, कथमिमामुल्लङ्घ्य व्यवसञ्चरणमास्थीयते प्रभाकरेणेति सुधियो विचारयन्तु । पद्ये वेदान्तमते जयश्रीप्रसङ्गस्तु 'जितं प्रभाकरैः' 'तथापि दिगम्बरत्वप्रसङ्गः' इत्यादिवत् तत्र तत्र स्वसम्मतत्वविरहेऽपि प्ररपरिभवप्रदर्शनफलकतया समाधेयः । निगूढो विशेषस्तु,

"समानान्वयजातानां परस्परविरोधिनाम् ।
परैः प्रत्यभियुक्तानां प्रसूते सङ्गतिः श्रियम्" ॥

इति—श्रीकृष्णमिश्रोक्तौ दत्तावधानैरवगन्तव्यः । वेदप्रामाण्याभ्युपगन्तॄणां सत्यपि मिथोविरोधे तदनभ्युपगन्तृसौगतादिमतदूषणाय प्रतितन्त्रसिद्धान्ताश्रयेण मेलनं जयावहं कर्त्तव्यञ्च तदिति हि तदाशयः ।

अद्वैतवादी भ्राता मे, स ते जेतायवास्म्यहम् ।
अयावकाशो नास्त्यत्र तव, बौद्ध ! किमीहसे ॥
इति स्वपक्षे सप्रेम्णो न्यायसो वचसा शिशुः ।
घोषयत्यबलेपान्धस्तस्मादभ्यधिकं बलम् ॥

"अस्तु तर्हि शून्यतैवे"त्यादि सन्दर्भस्तु व्याख्यातपूर्व्वः न तेनाद्वैतमतानुप्रवेशस्तस्मिन् चद्वातिरेको वा न्यायाचार्य्याणां सूच्यते, किं तर्हि—स्वपक्षप्रेमेति, एतदेवोपसंहृत्य न्यायाचार्य्यैरुपरिष्टात् दर्शयिष्यते न वाङ्मभेदमवधूय इत्यादिपद्येन, तच्च पद्यं तत्प्राक्तनग्रन्थास्माभिरुपदर्शितपूर्व्वं साशयवर्णनं व्याख्यातञ्च, तत्र न्यायमतस्यैव प्राधान्यज्ञापनात् प्रभाकरप्रजल्पितमुपेक्षणीयम्—। यथा प्राभाकरी युक्तिस्तथा तदुद्धृतप्राचीनव्याख्यानम्, उच्यते हि यक्षानुरूपो बलिरिति, तथाहि तत् प्राचीनव्याख्यानम्—" १ "वाङ्मभेदं—घटादिवाह्यार्थं निरस्कृत्य ज्ञानस्य वृत्तिः सम्बन्धः क्वापि नास्ती"त्येकं, अत्र दूषणं न तत्र आन्तरे सुखादिरूपेऽर्थेऽपि ज्ञानसम्बन्धस्य सत्वात् २ "तद्बाधके—ऽद्वैत ब्रह्मरूपाधिष्ठानसाक्षात्कारे जाते तु बलिनि—सर्व्वमतेभ्यो बलवति वेदनये वेदान्तदर्शने जयश्रीः आयोत्कर्षकाष्ठा" इत्यन्यत्, अत्र दूषणं तदपि मन्दं ब्रह्मसाक्षात्कारदशायां विचारजयश्रीणां बाधितत्वेनासम्भवात् प्रमाणप्रमेयव्यवहारस्याविद्यागोचरतायामसत्पर्य्यवसायितुत्वात्, उदरदरत्वाच्च । ३ नोचेद्वनिन्द्यमिति पद्यस्यपाठः, नोचेदनिर्त्यमिति प्रभाकर पाठतद्व्याख्याने स्वसन्दर्भवैयर्थ्यादुपेक्ष्ये, अत्र सन्दर्भः पश्चाद् ततः, "यमाश्रित्य जगविन्द्यीयते इति" अत्र निन्द्यत इति पाठान्तरम् । ४ एवम्-अस्तु तर्हीत्यादि सन्दर्भव्याख्यानमपि तादृगेव, तथाहि—"निषधतियोगिकं प्रपञ्चप्रतियोगिनत्वस्य स्वनिष्ठस्य मिथ्यात्वेन तच्छून्यं । विधिरूपं—निर्व्विकल्पकधीवेद्यम्" इति व्याख्यातं अत्र दूषणं तन्मन्दम् प्रपञ्चस्यापारमार्थिकत्वादिति मूलस्य लाक्षणिकत्वापातात्, विधिरूपमित्यत्यनिर्विकल्पकधीवेद्यमिति व्याख्याया घटशब्दस्य पटार्थकत्वकथनवदुपेक्षणीयत्वाच्च । स्थलान्तरमपि अस्मदुपदर्शितव्याख्यानमवेक्षमाणै रवलोक्य विचारणीयम् । यच्चोक्तमन्यच्च अनेनैव नैयायिक-

वर्य्याचार्य्यधुरन्धरैरित्यादिना (सं-भा० १ म भागे ४ म सं० ५३ पृ. १५ पं०) तदप्यप्रतिपत्तिविप्रलम्भविजृम्भितम् । तथाहि प्रपञ्चमिथ्यात्वश्रुतेः प्रपञ्चसत्यत्वेनाप्रामाण्यं शङ्कितं तत्प्रामाण्यव्यवस्थापनाय अभिहितं "न सतात्पर्य्यकत्वात् निष्प्रपञ्च आत्मा ज्ञेयो मुमुक्षुभिरिति तात्पर्य्यं प्रपञ्चमिथ्यात्वश्रुतीनाम् आत्मन एव एकस्य ज्ञानमपवर्गसाधनमित्यद्वैतश्रुतीनाम्" इत्यनया न्यायाचार्य्यपादानां वाचो युक्त्यैव गम्यते प्रपञ्चो न श्रुत्या प्रतिषिध्यते नचाद्वैतं व्यवस्थाप्यते किन्तु मुमुक्षुभिः प्रपञ्चबहिर्भावेण आत्मैवैको ज्ञानविशेषैर्विषयीकरणीय इत्युच्यते, यदि वास्तवे प्रपञ्चशून्यत्वे श्रुतेस्तात्पर्य्यं तदभिप्रेतं स्यात् निष्प्रपञ्च आत्मा ज्ञेयो मुमुक्षुभिरित्यादिपर्य्यन्तानुसरणस्य वैफल्यमापद्येत, प्रपञ्चशून्यताया मुमुक्षुज्ञानसापेक्षत्वविरहस्याद्वैतमतसिद्धत्वात् किञ्च यो हि मिथ्यात्वश्रुतेरप्रामाण्यपूर्व्वपक्षः तदङ्गीकारेणैव अनुपन्यस्तयुक्तिकेन तस्य समाधानमित्यवियुक्ततरं स्यात् । "एको भवति इत्यादि पर्य्यन्तं लिखित्वा प्रभाकरेण (...) शून्यश्रेणी मुपन्यस्य परिमुषितः पाठः यत्र "तत्त्वानाय्यैं नाद्वैतं नापिच द्वैत"मित्यादिवर्त्तते ततश्च अद्वैतहानमाचार्य्याभिमतं, नचाद्वैतं चरम वेदान्तमतं तस्याहेयत्ववचनादिति प्रागेवोक्तं तदेव पुरद्वारं नत्वद्वैतमतं "तस्याः स्वत एव निर्व्वाणं यदाश्रित्य न्यायदर्शनोपसंहार इतीमं न्यायदर्शनस्य सर्व्वतः प्रकर्षं व्यक्तमभिदधतां न्यायाचार्य्यपादानां सन्दर्भमपहृत्य उद्धृतेन तदद्वैतनसन्दर्भेण "तस्मादभ्यासकामोऽपि अपद्वाराणि विहाय पुरद्वारं प्रविशे"दित्यनेन अद्वैतमतस्य न किञ्चिदपि परिपोषणमुपपादितं प्रत्युताक्षेप एव । तथाहि वाङ्मनसनिवृत्तिलक्षणाया योगनिष्ठायाश्चरमवेदान्तमतोपसंहारशब्देन आचार्य्यपादैर्ज्ञापितत्वात् "यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सहे"ति सैव योगनिष्ठा पुरद्वारम् अतो हि तेषां पद्यम् ।

श्रुतेः श्रुत्वात्मानं तदनुमनुक्रान्तवपुषो–
विनिश्चित्य न्यायादथ विहतहेयव्यतिकरम् ।
उपासीत श्रुत्या शमदमविरामैकविभवो
भवोच्छित्त्यै चित्तप्रणिधिविहितै र्योगविधिभिः ॥

अस्मिंश्च श्रवणमननदशयोः प्रपञ्च शून्यत्वानपेक्षणेन उपासनादौ प्रपञ्चपरिहारोपदेशेन च प्रपञ्चशून्यत्वस्य पारमार्थिकतायां श्रुतितात्पर्य्याभावस्य तैराविदितत्वात् अन्यथा यथाश्रवणं ,तथामननमिति रीत्या श्रवणदशायामेव प्रपञ्चशून्यत्वावगमे अपेत्यारभ्य उपासनादशायां तत्परिहारोपदेशस्य असङ्गतत्वं स्यादिति ।

"इदन्तु कणटकाचरणं तत्त्वन्तु बादरायणे" इति तु न्यायाचार्य्योक्तितया कल्पितो व्याहारो निर्मूलः समूलत्वे तु कस्य तत्त्वं किं तत्त्वं कीदृशव्याख्यानोपेत-बादरायणस्य तत्र ग्राह्यं किञ्च तद्बादरायणं महाभारतं वा पुराणादिकं वा इत्येतेषामनिर्णये तत्परीक्षाया न्यायदर्शनानुसन्धानसमस्त्वेनोपेक्षि नहि तन्मात्रे-णाद्वैतमतसमर्थनं कथमप्यापतति ।

यच्चोक्तं नश्वरारोपिततया मिथ्याज्ञानं मोक्षस्य साधनमिति कस्याप्यभिप्रेत-मिति तदप्यसत् मिथ्याज्ञानात्मकस्य अग्निहोत्रादिविद्याज्ञानस्यापि मोक्षहेतु-तायाः—शारीरकभाष्यकृद्भिः प्रतिपादितत्वात्, तथा च यज्ञविद्याज्ञानवत् आरो-पोपासनस्य मिथ्याज्ञानरूपत्वेऽपि चित्तशुद्धिद्वारैव प्रथमं योगजप्रत्यक्षद्वारा द्वितीय-मपि मोक्षहेतुः योगजप्रत्यक्षन्तु तत्त्वज्ञानमेव । यत्पुनरुक्तं "तर्कविद्याया मुख्यो-द्देश्यं" इत्यादिना तदप्यसुन्दरं न्यायदर्शनं तावदुपनिषदर्थपरिष्कियया मनन शोधनेन निर्व्वाण-तत्त्व-तदधिगमोपायाभिधानेन चोपकुर्व्वेत्, सर्व्वविद्यानां प्रदीपायमानमुपायभूतञ्च कर्म्ममात्रस्याश्रयश्च ·प्रवृत्तिनिवृत्तिधर्म्मोणामिति किमपह्नीयते शारीरकसूत्रभाष्येभ्यः, तान्यपि श्रुत्युपक्रियामन्तरेण स्वयमेव मुक्तिं साधयन्तीति न खलु श्रीमतामप्यभ्युपगमः ।

"यथाच अद्वैतमतस्य (सं· भा· ५५ पृ· १६ पं·) इत्यारभ्य अत कष्टम्" इत्यन्तेन यदुक्तं तदंशतो मृषैवेति प्रतिपादितं नश्वद्वैतमतस्य परमोत्कर्षः नैया-यिकैः कदाप्यङ्गीकृतः सौगताद्यपेक्षाया उत्कर्षस्तु अङ्गीकृत एव । शेषोत्तरञ्चैतद् अस्माकम्,

न द्विषन्ति-परान् द्वैत-वादिनः पापशङ्कया ।
अद्वैतिनस्तु निःशङ्का वर्त्तन्ते द्वेषमोषयोः ॥ १ ॥
न श्रुतिर्माधवाचार्य्यवचनं, सति बाधके ।
तत्प्रमाणं क्रियते, कृतं स्मार्त्तादिभिश्च तत् ॥ २ ॥
ईश्वरार्पितचित्तानां श्रीमतां द्वैतवादिनाम् ।
अवस्था चिन्तया हन्त रुदन्त्यद्वैतवादिनः ॥ ३ ॥
भगवद्भक्तिपीयूषरसास्वादनवञ्चिताः ।
ये शोच्यास्तेऽपि शोचन्ति भक्तानद्वैतवावकाः ॥ ४ ॥
तावन्मा शोचत द्वैत-कातरा भ्रातरः परम् ।
युस्माकं द्वन्दुसंरम्भाद् यावद् हसति नापरः ॥ ५ ॥
यदद्वैतमतं तथ्यं भवतां का विचारणा ।
अवहस्वपरभेदानां कथाया नास्ति सम्भवः ॥ ६ ॥

अथ मूढान् समुद्धर्त्तुं कथा चेन्मूढबुद्धयोः ।
भेदो नाद्वैतविश्रम्भि-सम्मतस्तत् किमुच्यते ॥ ७ ॥
अथ द्वैतं भ्रान्तिकृतं व्यावहारिकमेव तत् ।
कथा तदनुगैवस्चेत् कास्था भ्रमविजृम्भिते ॥ ८ ॥
शुस्योपदर्शितं वस्मं तच्चेत् किं धो विचेष्टितैः ।
नहि सूर्य्यावलोकाय दीपः प्रज्वाल्यते क्वचित् ॥ ९ ॥
तदर्थपरिशुद्ध्यर्थमिति चेद्वत शोधकाः ।
जाह्नवीजलसंशुद्धिं सुरया कर्त्तुमिच्छथ ॥ १० ॥
द्वैते सत्येऽपि तज्ज्ञानविरहादद्वयात्मता ।
यस्य स्यात् स मुनिर्धन्य इति नैयायिकं मतम् ॥ ११ ॥
न तस्य ध्याननिष्ठस्य व्यवहारः प्रवर्त्तते ।
प्रवृत्ते तु पुनस्तस्मिन् पतनं जायते ततः ॥ १२ ॥
तस्मादद्वैतसिद्ध्यर्थे यो विचारः प्रवर्त्तते ।
तेनैव द्वैतसंसिद्धिः संवादिव्यवहारतः ॥ १३ ॥
वैतण्डिकानां केषाञ्चित् प्राचामपि न कल्पितैः ।
वस्तुतत्त्वान्यथाभावः स्याच्चेद्वा नास्तिकोर्जितम् ॥ १४ ॥
येऽपूयन्ते परोक्तिभ्यो विहन्यन्ति च संशयैः ।
हन्ताद्वैतगिरस्तेषां जयन्त्यद्भुतशक्तयः ॥ १५ ॥
नोपास्यो नैव मान्योऽस्ति न निषेधो न वा विधिः ।
इत्यद्वैतनयं प्रायो गृणन्त्युच्छृङ्खला जनाः ॥ १६ ॥
कथञ्चेन्मोक्षहेतुत्वमद्वैतवचसामिति ।
युक्तोक्तिर्व्यध्वगन्तृभ्य स्तेभ्यो न खलु रोचते ॥ १७ ॥
पूर्व्वाचार्य्यवचोव्याजात् पाठाप्लववघट्टितम् ।
परवञ्चनमपि क्रियते तैरशङ्कितम् ॥ १८ ॥
दर्शितं निगदे तच्च तदबुद्धिकृतञ्च यत् ।
सन्तः सर्व्वमवेक्षन्तामथान्यद्दूषयिष्यते
तीर्थद्वैताभिधानान्त वीरभद्रादिशर्म्मणः ।
कालीभक्तस्य सर्गेऽस्मिन् सन्तः सन्तु परीक्षकाः ॥

षट्पदीविवरणम्।

२य वर्षस्य २य खण्डस्य १४८ पृष्ठतोऽनुवृत्तम्।

अत एव समाधेरपरोक्षवृत्त्या सन्निकर्षो भवति साक्षाद्दित्यपि न विस्मर्तव्यम्। तस्या अपि ध्यानवृत्तेः स्वरूपानभासेन व्यवधायकत्वायोगात्. नचास्त्यन्यद् व्यवधायकम्। ततश्च प्रत्यगभिन्नपरमात्मनि चित्तं समाधीयमानं वस्तुमद्व्यवधायकाभावेन स्वहेतुबलाभ्युदेष्यमाणाखण्डाकारवृत्तिसहायमावृतिदुर्योपेताज्ञानतिरस्कारेण निष्प्रत्यूहमपवर्गयोग्यं भवितुमर्हतीति भावः। ४८। ४९।

स्यादेतत्. निर्विशेषब्रह्मावगतिफलप्रेप्सुभिस्तदनुकूलश्रवणादिसाधनमेवाभिमतफलनिष्पत्त्यंगमनुसरद्भिर्भवितव्यम्। नह्यन्यगोचरेण व्यापारेणान्यत्र क्रियानिष्पत्तिः सम्भाविनी। न जातु खदिरगोचरेण परशुना पलाशे छिदिः कर्तुं शक्या। ततश्च निर्विशेषश्रवणसाधनेन समाधिना सर्वथा निर्विशेषात्मगोचरेण भवितव्यम्। तथा च दर्शितध्येयोपवर्णनमर्थान्तरग्रस्तमेव। न चाविशुद्धसत्त्वानां निर्विशेषात्मगोचरसमाधिर्नितरां सुकर इति प्रथमं मनोनिवेशाच्चित्तं व्यावहारिकप्रपंचेषु शुचिरचिरतरपरिकरप्रचुरं व्यवहारव्युत्पन्नानां द्वैतदर्शनोपचितवासनाराशीनां प्रमातॄणां कृते परमात्मपदसरोजरूपं ध्येयं द्वैतभावयोपदिशन्नपि परमार्थेसति निर्विशेषात्मनि वाचोभंग्या समाधिं परिशेषयांबभूवाचार्यः। ततश्च क्रमवतोः सविशेषनिर्विशेषगोचरसमाध्योः स्ववर्णनायामर्थान्तरशंकावकाशः, उपायोपेयभावेनोभयोरपेक्षितत्वादिति वाच्यम्। द्वैतभावयोपदिशन्नपि निर्विशेषात्मनि प्रमातारं तदैवावतारयितुं पारयेत् यदा सविशेषात्मसमाधिनिष्ठायाः फलमनूद्य ततोऽप्युत्कर्षं समीहितफलस्यादर्शयेत्, न पुनः सविशेषसमाधौ निरवशेषं समीहितफलमुपवर्णयताऽऽचार्येण निर्विशेषात्मगोचरसमाधेरावश्यकतापि संरक्षितेत्यत्र किंचिदपि लिंगं निरीक्षामहे। अद्वैतवादे च क्वचन सविशेषोपासनायाः कैवल्यफलनिर्देशादर्शनाद् अप्रसिद्धान्ताच्च। यत्तु कल्पतरुकारैः "निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः। ये मन्दास्तेऽनुकम्प्यन्ते सविशेषनिरूपणैः। वशीकृते मनस्येषां सगुणब्रह्मशीलनात्। तदेवाविर्भवेत् साक्षादपेतोपाधिकल्पन"मित्युक्तम्। तदपि "सगुणोपासनं चित्तैकाग्र्यप्रतिपत्तिफलम् न पुनर्निर्विशेषात्मसाक्षात्कारांगम् तज्जनितैकाग्र्यप्रतिष्ठा तु वस्तुतस्तुल्यविषयतया विचारस्योपकुर्वती परम्परया निर्विशेषसमाधिपर्यवसन्ना निर्विशेषब्रह्मावगतिफलायालमित्येवाभिधत्ते, वशीकृते

मननस्येषां सगुणब्रह्मशीलनादित्युल्लेखस्वरसात् । इत्थं च प्रकृतेऽद्वैतवादोपयुक्तसविशेषनिर्विशेषात्मब्रह्माधिकृततत्फलयोरनुपन्यासात् प्रत्युतद्वैतसम्प्रदायाभ्युपगतरीत्या निरुपाधिसच्चिदानन्दलक्षणब्रह्मणो ध्येयत्वेनोपन्यस्तश्रीपतिपदारविन्दपरिमलभावोद्भावनादर्थान्तरत्वापसिद्धान्तयोर्दुरुद्धरत्वादित्यनुशयेन व्याख्यानान्तरमुपक्षिपति किंवेत्यादिना—परेशितुः परमात्मनः, परोक्षं शाब्दादिरूपम्,

षट्पदीविवरणम्—किम्वापरोक्षमपरोक्षमिति द्विधा स्याज्

ज्ञानं परेशितुरिदं पदशब्दवेद्यम् ।
स्थैर्य्ये गतिं ह्यभिदधत्पदिरेष युक्त्या
ज्ञानार्थ एव, न तिरोहितमत्र किंचित् ॥ ५० ॥

अपरोक्षं साक्षात्कारिरूपम्, द्विधा ज्ञानं स्यादिति प्रकारभेदेन ज्ञानद्वयं स्यादित्यर्थः । इदं ज्ञानद्वयम्, पदशब्दवेद्यम् प्रकृते पदशब्देन प्रतिपिपादयिषितम्, भवतीति शेषः । ननु किं रूढित्यागे लक्षणाऽऽश्रयणीया ? नेत्याह—स्थैर्य्ये गतिं ह्यभिदधदिति । हि यतः, स्थैर्य्ये स्थितिं, गतिं प्राप्तिं, अभिदधत् इत्यस्य गणभेदेनेत्यादिः । प्रतिपादयन् एष व्याख्येयग्रन्थसन्निधापितः, पदिः पदधातुः, युक्त्या औचित्येन, ज्ञानार्थ एव, ज्ञानमेवार्थः तात्पर्य्यविषयो यस्य तादृश एव पर्य्यवस्यतीति शेषः । अत्र प्रकारान्तरेण पदशब्दार्थाभिधाने, किंचित् किंचिदपि, न तिरोहितम्, तिरोहितमिव न भवति, तयोः सरोजत्वारोपस्य स्वर्गाद्यसम्बन्धस्य परिमलवत्तायाश्च वक्ष्यमाणदिशोपपन्नत्वात् तद्वशेन समाभ्युपगमनस्याप्युक्तमधनद्वारोद्भावनीयत्वादित्यर्थः । अयमभिसन्धिः । मा भूत् निर्विशेषसच्चिदानन्दात्मनो नारायणपदपद्मपरिमलत्वानुसन्धानं प्रकृते विवक्षितुमुचितम् । तथापि द्वैतवासनावासितानामपि परात्मबोधनिष्ठामुपपत्तिबलेनैव सम्पादयितुमाचार्य्याणामयमुद्यमः । परमार्थतस्तु परात्मगोचरं परोक्षापरोक्षरूपं ज्ञानद्वयमिव पदशब्देन विवक्षितम् । स्थैर्यगत्योर्गणभेदेन संकेतितस्य पदधातोः सर्वथा ज्ञानार्थ एव पर्यवसानौचित्यात् । युक्तं ह्येतत्, स्वप्रकाशमप्यनिर्देश्यं मनसाऽप्यचिन्त्यवैभवं हि ब्रह्म, वस्तुतः प्रमातुरात्मभूतमपि विवेपा-

वरणाशक्तिद्वयोपेतानादिमायावशेन सुदूरविप्रकृष्टमिवावतिष्ठते । तच्च ध्यातुर्हृदयपीठमध्यासितुमसत्त्वाभानात्मकावरणव्यापारद्वयापगममन्तरेण नेष्टे इत्यवश्यं परोक्षापरोक्षवृत्तिद्वयमपेक्षणीयम् । तत्र च पदाति प्रतिष्ठते, पद्यते गच्छति इतिव्युत्पत्तिभेदेनोभयत्रैव पदशब्दो वर्त्तते । नहि कूटस्थनित्यविभोर्दर्शितज्ञानद्वयादन्या स्थितिर्गतिर्वा युज्यते, साध्यात्मनाऽभिधायकाध्यात्माकांक्षपदार्थस्य स्थैर्य्यस्य स्वरूपसत्ताव्यतिरिक्ततायाः आवश्यकत्वात् एवं चौचित्येन दर्शितवृत्तिद्वयमेव पदधात्वर्थः पर्य्यवसित इति सर्वमनाकुलम् ॥ ५० ॥

अथ तादृशज्ञानद्वये सरोजत्वारोपे कारणमुपन्यस्यन् भगवत्पदस्वसम्भवमोविच्छेत्तुं सुरनदीसम्बन्धम्बोधयति ;–तद्द्वन्द्वमित्यादिना–

इह पदीविवरणम्–तद्द्वन्द्वमब्जसदृशं प्रविकाशयोगा–
दाभासभास्करकरानुगमादवश्यम् ।
तद्वासना, सुरणदीव निहन्ति पापम्
संस्कारचक्रमयथार्थमतिप्रकृष्टम् ॥ ५१ ॥

तद्द्वन्द्वम्· तादृशपरोक्षापरोक्षवृत्तिद्वयमित्यर्थः । अब्जसदृशम् पद्मत्वारोपभाजनम् । भवितुमर्हतीतिशेषः । कुत इत्याह· आभासभास्करकरानुगमादवश्यम् प्रविकाशयोगात्· पंकजस्य भास्करकरानुगमात् प्रविकाशो विकसनमुन्मीलनम् । वृत्त्योः पुनश्चिदाभासवशेनैव स्वस्वारूढविषययोः प्रविकाशो विषयीकरणमिति विवेकः । अवश्यमित्यनेन दृष्टान्तदार्ष्टान्तिकयो रुभयत्रैव परप्रकाश्यत्वाव्यतिरेक आदर्शितः । यद्यपि ब्रह्माकाराकारिताखण्डवृत्त्याऽऽवरणभंगे जनिते स्वप्रकाशब्रह्माधिगमार्थं नाभासापेक्षाऽस्ति । अन्यथाऽप्रमेयत्वादिवाचो निरर्थिकाः प्रसज्येरन् । अतएव "ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता । फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निराकृतमि"त्यादिकं संगच्छत इति विभाव्यते, तथापि घटादिपरोक्षापरोक्षवृत्तिसाधारण्येनौत्सर्गिकमाभासप्रकाश्यत्वमभिप्रेत्यैवेह तथोक्तमित्यवसेयम् । वस्तुतस्तु परमात्मगोचरयोरपि परोक्षापरोक्षवृत्त्योश्चिदाभासैकप्रकाश्यत्वेऽविवादात् वृत्तिविषयतयैव तत्र क्रियाकर्म्मभावोपपत्तेः फलविषयत्वा-

भावाभिप्रायकदर्शितांविषयत्वादिप्रतिपादकश्रुतिसमर्थनसम्भवात्, वृत्तिप्रकाशन-मात्रेण च प्रकृते परोक्षसादृश्योपपादनसम्भवात् । वृत्तिविषयपर्य्यन्तप्रकाशनस्य प्रकृतानुपयुक्तत्वेनाविवक्षणादसंगत्यभावात् । न च वृत्त्याऽऽवरणभंगे तत्र चिदाभासकल्पनाऽनर्थिकेति वाच्यम्। वृत्तेर्जडतया चिदाभासं विना तत्प्रकाशा-सम्भवेन तद्गोचरसंशयविपर्य्ययादिनिरासायोगात् । वृत्तेऽपि ज्ञाने ब्रह्मज्ञानं मे जातं नवा ? न जानाम्यहं ब्रह्मेत्यादिसंशयविपर्य्ययोर्यथापूर्वं प्रसंगादिति दिक् ।

तद्वासनेति· तयोः परोक्षापरोक्षब्रह्मज्ञानयोः संस्कार इत्यर्थः । सुरणदीव स्वर्गेगेव, साधारणधर्ममाह अयथार्थेति, अयथार्थमतिः अनादिमिथ्याज्ञानम्, तया प्ररूढमुपचितं संस्कारचक्रम् निहन्ति, ननु सुरणद्याः संस्कारनाशकत्वमन-भिहितमत आह–पापमिति· पात्यस्मादात्मानमितिव्युत्पत्तेः मिथ्याज्ञानसंस्कारचक्र-स्यापि पापत्वम् बन्धहेतुत्वेन तत आत्मरक्षणस्यापेक्षितत्वात् । सुरणदी किल पापं निहन्ति, ब्रह्मज्ञानवासना पुनर्मिथ्याज्ञानवासनाराशिमित्यतो युक्तो ब्रह्मज्ञानवासनायां सुरणदीत्वारोप इतिभावः । इत्थं च दर्शितवृत्तिद्वयस्य प्रमातृहृदयपीठे भगवत्प्राप्तिप्रतिष्ठादिहेतुत्वात् चिदाभासासादितप्रकाशत्वात् मिथ्याज्ञानवासनाराशिनाशपटीयस्यां वासनायामवसितत्वा विरूपितदिशा भगवत्पादपद्मत्वारोपयोग्यत्वमव्याहतमिति दिक् ॥ ५१ ॥

तयोरेव परिमलत्वमाविष्कर्त्तुं मूलोक्ते सच्चिदानन्दांशेषु परिमलत्वारोपे बीजमुद्घाटयति । यथेत्यादिद्वयेन–

षट्पदीविवरणम्–यथा परिमलं दूरादीषदाघ्राय षट्पदः ।

सुव्यक्तमुपजिघ्रासन् कमलान्युपसर्पति ॥ ५२ ॥

तथा प्रमाता किल विश्ववृत्तिषु

मनाक् सदाद्यंशमवेत्य तं स्फुटम् ।

दिदृक्षते क्षीणरजस्तमोमले

परोक्षसाक्षात्कृतिवृत्तिपंकजे ॥ ५३ ॥

यथाषट्पदः दूरात् परिमलं ईषदस्पष्टमाघ्राय तु पुनः सुव्यक्तमुपजिघ्रासन्

कमलान्युपसर्पति । तथा प्रमाताऽन्तःकरणावच्छिन्नचेतनः, विश्ववृत्तिषु प्रपञ्चगोचरमकलुषु दूरपरिणामेषु ज्ञानलक्षणेषु सदात्मांशं सच्चिदानन्दभागम् मनागीषद्देशावेक्ष्य तं भागं लोकरजस्तमोमले परोक्षमात्रास्फूर्तिवृत्तिपंकजे स्फुटं दिदृक्षते । अयमर्थः । दूरतरतरसीमसमुन्मीलत्कमलवनादनिलानीतपरिमललवविमुग्धो मधुपो यथा तल्लिंगावधारितसरोजराजिमंजुलं सरः प्रत्यासीदति क्रमेण परिमलं स्फुट मुपजिघ्रंश्च, तत्र चेष्टं मधु धयानो विश्राम्यति, तद्वदयं प्रमाता गृहपुत्रकलत्रपश्वादिनश्वरासुन्दरजड़गोचरनिखिलवृत्तिषु अधिष्ठानगतं सच्चिदानन्दलक्षणमंशत्रयमज्ञानमारोप्यमाणं मिष्टो घटः भाति घटोऽस्ति घट इत्याद्याकारेण नितरामवभास्यन् स्वकृतसुकृतपरिपाकवशाल्लब्धविवेको यदा प्रपञ्चोपसर्जनभावेनांशत्रयावभासिष्वतृप्यन् प्राधान्येन तदंशत्रयमवगन्तुमुत्सहते, तदा परोक्षापरोक्षरूपासु ब्रह्मस्वरूपगोचरासु वृत्तिषु निरस्तरजस्तमोमलतया स्वरसतः कमलाधिकपेलवासु द्रागेवानुषज्जते । अत्र च दृष्टान्ते गन्धवद्गुणसंघस्येतरगुणसंघमहत्त्वसन्निपातेन गन्धानुभवापकर्ष इत्यर्थः । दार्ष्टान्तिके तु गन्धत्वारोपभाजां सत्ताचित्त्वानन्दानां रजस्तमःसमुद्रेकसमुद्भूतविपर्ययवासनावशाद्दर्शितदिशोपसर्जनभावेनाप्रधानतयाऽवभासो मनागर्थः । दृष्टान्ते च देशव्यवधानं दूरत्वं, दार्ष्टान्तिके पुनर्वैशेष्यविपर्ययमात्रकृतं व्यवधानमेव दूरत्वम् । दृष्टान्तदार्ष्टान्तिकयोरुभयत्र चास्फुटग्रहणमेव परिपूर्णावबोधोत्कण्ठोपजननद्वारेण स्वाभीष्टप्राप्तिहेतुः, न खलु मिलिन्दस्य कमलप्राप्तिमन्तरेण प्रमातुर्ब्रह्माकाराखण्डवृत्तिजननं विना दूरात्परिमलग्रहणमात्रेणोपसर्जनभावेन सदादिबोधमात्रेण किंचित्कृत्यमस्ति, तथापि परिमललेशग्रह इव मनागपि सदाद्यवधारणमेवाभीष्टप्राप्तिपर्यवसायीति परिमलस्यैव महिमेति व्यञ्जितम् । तद्ग्रहणनियतग्रहणविषयतालक्षणो वैज्ञानिकश्च गौणमुख्यकमलसाधारणो गौणमुख्यपरिमलसम्बन्ध इत्याद्यूहनीयमिति । इदं पुनरिहावधेयम् । प्रपंचप्रत्ययो हि प्रवृत्तिस्वारस्यसिद्धये विषयेष्ववश्यमिष्टत्वमवगाहत इत्यास्थेयम् । न च तदानीमनन्तरोत्पन्नेष्टत्वज्ञानान्तरेण प्रवृत्तिरुपपादनीया, तथा सति ज्ञानस्योत्सर्गि-

प्रवृत्तिप्रवणता न सिद्ध्येत्, ज्ञानान्तरेण प्रवृत्तिव्यवधानकल्पने गौरवं च स्यात् । प्रत्युत ज्ञानमात्रस्य सुखस्वभावसत्त्वपरिणामत्वत्वादिनामिष्टत्वाकारतायां विवादानवकाशात् । नापि स्वगोचरसत्तोल्लेखेऽपि विवदितव्यम् । नह्यस्ति सम्भवो घटोऽयमित्यवगच्छति च तस्य सत्तायामुदास्ते चेति । तथा सति बाधकप्रत्ययस्यार्थवत्ता विलुप्येत । नहि सिद्धान्तेऽनिर्वाच्यवस्तूत्पत्तौ स्थितायां शुक्तिरूप्यस्य व्यवसायो न रूप्यं गोचरयति, यतो नेदं रजतमितिनिषेधेन तस्य रूप्यात्मकविषयस्वरूपमेवापह्नूयेत । किं तु रूप्यस्य सत्त्वमपि व्यवसायेन विषयीकृतमासीत्, तदपहारेण च बाधकप्रत्ययस्यार्थवत्त्वमुपपद्यत एव । एवं स्वप्रकाशवादस्य सिद्धान्तसिद्धतया व्यवसायेन भासमानविषयस्वरूपस्य 'भातो घट' इत्याद्याकारेणावभासनोपपत्तिः । इतरथा घटादिदर्शिनोऽपि 'घटोमया दृष्टो न वा' 'न च मया दृष्टो घट' इत्यादि संशयविपर्य्ययोर्यथापूर्वमनिवृत्तिप्रसंगात् । इत्थं चावश्यकसच्चिदानन्दांशत्रयं प्राणभृद्भिर्नियमेनानुभूयत एव । तेष्वेव खलु निखिलस्यापि पुरुषार्थस्यातितरां निर्बन्धः, नहि असत्यमपि सत्त्वेन, जडमपि स्फुटत्वेन, निरानन्दमपि सुखमयत्वेन, फलं वा साधनस्तोमं वा नाध्यवस्यन् किंचित्कामयते किंचिदारभते किंचिदाप्तुं प्रभवति वा प्रमातेति तत्प्रवणतया स्वरसप्रवृत्तेन भाग्योदयासादिताखण्डाकारवृत्त्योरभिनिवेशवता तेन भवितव्यमिति ॥ ५२ ॥ ५३ ॥

स्यादेतत्, पूर्वव्याख्यायां भगवच्चरणद्वयस्यैवोत्तरव्याख्यायां परोक्षापरोक्षवृत्तिद्वयस्यापि वाक्यार्थत्वविवक्षायां समुपक्रान्तसमाधिसमर्थनानुपपत्तिः । न चालम्बनमुखेन पूर्वव्याख्याने तदुपजीवकमुखेनापरव्याख्याने च समाधिरेव विवक्षित इति वाच्यम् । पदोपस्थाप्योऽप्यर्थः कदाचित्तात्पर्य्यवशाद्वाक्यार्थभावमापद्यते । न च प्रकृते समाधिमभिदधत् किंचिदपि पदमुपलभ्यते, येन समाधिरेव कयाचित् प्रणाड्या तात्पर्य्यपर्य्यवसानभूमिरित्युपपद्येतेत्याशंकामपनेतुकामो वदेरर्थकथनमुखेन विवक्षितं निगमयति—वदिरित्यादिना—

षट्पदीविवरणम्—वदिः प्रकर्षप्रतिपादनार्थकोऽ-

तः समाधे रतदुत्तमत्वतः ।

स्वार्थेऽवधीकृत्य समाहितं तदु-

त्कर्षं विधातुं प्रभवेन्नचान्यथा ॥ ५४ ॥

प्रकर्षप्रतिपादनमेवार्थः प्रयोजनं यस्य तादृशो वन्दिर्वन्दतिर्धातुः समाधेर्निरुक्तैका-ग्रतालक्षणस्य, अतदुत्तमत्वतः, तयोरुत्तमो न भवतीति अतदुत्तमः, तस्य भावस्त-स्मादिति पञ्चम्यर्थे तसिः । अतः, शब्दार्थगतिपर्य्यालोचनया तदेव समर्थयति स्वार्थे इति, स्वं वन्दतिधातुः, स्वस्यार्थः अभिधेयः, स्तुतिर्नमस्कारो वा, तस्मिन् समाहितम्, समाधिप्रतिष्ठं प्रमातारम्, अवधीकृत्य प्रतियोगित्वेनोपन्यस्य, तदु-त्कर्षं तयोः श्रीभगवत्पादपद्मयोरखण्डाकारवृत्त्योर्वा, उत्कर्षं प्रकर्षं अतिशयम् विधातुमवबोधयितुम्, प्रभवेत्, न च अन्यथा, नानुपन्यस्येत्यर्थः । अयमभि-प्रायः, स्तुतिनमस्कारादौ हि प्रवर्त्तमानो यावच्छक्यम् स्तुत्यस्य नमस्कार्य्यस्य वा स्वरूपपरिज्ञानपूर्वकमेव प्रवर्त्तते, स्वावधिकोत्कर्षस्वव्यावृत्तगुणवत्त्वस्य वा स्तुति-नमस्कारोपाधित्वेन तदननुसन्धाने स्तुत्यादेरेवासम्भवात् । नह्यस्ति सम्भवस्तद-न्यत्र मनोधत्ते तस्य तदितरव्यावृत्तमतिशयं च स्वव्यापारेणावेदयेत् । न खलु कुशलोऽपि धानुष्कः प्रतियोगिनोऽभिमतमंशविशेषं लक्ष्यभूतं काममप्रणिहितमनाः शरैश्छेत्तुमर्हति । निपुणोऽपि वा कारुरनवहितः किञ्चिदंगं तूलिकयाऽऽलेख्ये-ष्वभिमतवर्णै रंजयितुं प्रभवति । तथा च भगवत्पादपद्मयोः समाहितमनसैव सर्व्वे-षोत्कर्षः प्रदर्शयितुमर्ह इत्यकामेनाभ्युपेयम् । लोके च स्वल्पगुणस्यैव परकीय-तज्जातीयगुणोत्कर्षख्यापनमेव स्तुतिनतिपदार्थौ मुख्यौ न पुनः प्रक्षीणगुणस्य, न खलु दरिद्रप्रदर्शितधनवत्ता, राजादेर्महत्त्वप्रतिपत्तये भवति, भवति च धनिकप्रदर्शितैव । न जातु चक्षुष्मतामन्धकृता स्तुतिश्चक्षुरुत्कर्षप्रतिपादनायाल-मलन्तु सर्वथा स्वल्पदृशाऽपि कृतेति न परोक्षमेतत् प्रेक्षावताम् । प्रतिपाद्य-मानश्चोत्कर्षः प्रतिपादयितरि उपस्थितमेव गुणादिकमवधितायां निमित्तत्वेनो-पक्षिपति तुल्यरूपञ्च, नानुपस्थितं न च विसदृशम् । अनुपयुक्तो हि विसदृशो-ऽनुपस्थितश्च गुणादिः स्वनिमित्तकस्य परकीयगुणोत्कर्षावधित्वस्य बोधने, न खलु राजानं स्तुवन् नमस्कुर्वन् वा दरिद्रः धनशीलादिगुणाहङ्कारः न

सम्भवति, नचास्य सन्तोऽपि तावन्तो गुणा धनवत्तया राजादिस्तुतिनमस्कारयोरौचित्येनोपयुज्यन्ते । एवं चाद्यव्याख्यानुसारेण भगवत्पादपद्मनतिरेव वन्द्यत्यर्थः, तत्र च प्रणमतः समाधिरेव प्रकरणपर्य्यालोचनया प्राप्तः सद्वंशभूतोगुणः, उपात्तगंगादिविशेषणभवभयोच्छेदादिफलबलेन लौकिकश्रुतशीलकुलविभवाद्यखिलगुणपरिहारस्यौचित्येनावर्जनीयोपजीव्यभूतसमाधानस्यैवोत्कर्षावधित्वनिमित्तत्वोपपत्तेरावश्यम्भावात् । ततश्चानायत्योवस्थितसमाधौ पावनत्वोपादेयत्वादिना गंगादिसादृश्यमवसेयम्भवति । तेन स्वगतसमाधानगुणस्य स्वमात्रपावनत्वेऽपि भगवत्पादद्वयस्य जगत्पावनगंगासम्बन्धात्, तस्यैव च स्वं प्रत्युपादेयत्वेऽपि भगवत्पादपद्मद्वयस्य सकलमुमुक्षूपादेयसच्चिदानन्दसम्बन्धात्, तस्यैव पुनः समाधेः स्वापवर्गफलत्वेऽपि भगवत्पादद्वयस्य जगदुद्धरणक्षमत्वेन प्रमातृमात्रापवर्गफलसम्बन्धाच्च सर्वथैवोत्कर्षः सुग्रहोभवति । अन्त्यव्याख्यानुसारेण तु दर्शितदिशा भगवद्गोचरपरोक्षापरोक्षवृत्तिद्वयस्तुतिरेव वन्द्यत्यर्थः । तत्रापि स्ववृत्तिगुणाविधिकोत्कर्षस्यानुभाव्यतया विवक्षितविवेकेनोपजीव्यभूतसमाधिरेवावधित्वेन उपक्षिप्यते । दर्शितन्यायेनेतरगुणसहस्रस्यानुपयोगात् इत्थं च व्याख्याद्वयेऽपि पदाप्रतिपाद्यस्यापि समाधेरुपात्तस्तुतिनत्यादिपदार्थप्रतीत्यनुरोधेन वाक्यार्थत्वमवश्यं कल्पनीयमिति तदुन्मथनं शक्यसमर्थनमिति दिक् ॥ ५४ ॥

केचित्तु समर्थासमर्थाधिकारिभेदादवलम्बनीययोर्भगवज्ज्ञानध्यानयोरेव पदत्वं विवक्षन्ति, अपरे च पुनस्तथाभूतयोर्ज्ञानभक्त्योः परस्परसापेक्षप्रसंगयोस्तथात्वमातिष्ठन्ते । अतस्तेषां विवक्षासाधारण्येन प्रकृतस्य ग्रन्थस्य समाधिपरतामाविष्करोति—ज्ञानं ध्यानयुतं चेके इत्यादिना—

षट्पदीविवरणम्—ज्ञानं ध्यानयुतं चैके ज्ञानं भक्तियुतं परे,
पदद्वयं विवक्षन्ति, तयोरुभयः समन्वयः ॥ ५५ ॥

तयोरिति, यश्च ज्ञानध्यानयोर्भगवत्पदत्वारोपपक्षः, योवा ज्ञानभक्त्योस्तथाभावारोपपक्षस्तदुभयोरित्यर्थः । अत्र च निर्विशेषं परं ब्रह्म साक्षात्कर्त्तुमनीश्वराः ।

ये मूढास्तेऽनुकम्प्यन्ते सविशेषनिरूपणैरित्याद्यभिमतदिशा समर्थनीयस्य समर्थासमर्थाधिकारिव्यवस्थितज्ञानध्यानोपायद्वयस्य यद्यपि सव्येतरयोरिव पादयोः प्रकर्षापकर्षवत्तया विविक्तविषयत्वेनानाकुलं तत्तदभिलाषुकसहस्रावलम्बनीयतया च भगवत्पदत्वसमारोपणार्हत्वमेव, तथापि तयोः पुरुषपारतन्त्र्यापारतन्त्र्योपचरितानुपचरितविषयत्वाविनाऽत्यन्तविरुद्धस्वभावतया परस्परनैरपेक्ष्यप्रवृत्तिकयोस्तथाभावारोपेणोपपत्तिसह इति सूक्ष्माविकतामुपजीवन्तोऽपरे तत्पदं प्रतिक्षिपन्तो ज्ञानभक्त्योरेव पदत्वारोपपक्षं रोचमाना विवक्षन्तीत्याशयः। कश्चः समन्वय इति। निर्विवक्षितसमाधितात्पर्य्येण तदुभयपक्षयोरुपदर्शितपदद्वयगोचरवन्दनार्थेकदर्शितवाक्यांशसंगमनं स्वयमूहनीयमित्यर्थः। इदमत्राकूतम्। दर्शितयोर्ज्ञानध्यानयोर्ज्ञानभक्त्योर्वा पदशब्दितत्वं तदुभयेनेतरयावृत्तिविशेषणवत्त्वं पूर्ववदेवाक्षतम्। भक्तेरपि वक्ष्यमाणयुक्त्या वृत्तिविशेषरूपत्वात्स्वग्रहणार्थमाभासावश्यम्भावाच्च। चदिशब्दोपसन्धानबललभ्यसमाध्यवधिकप्रकर्षवत्त्वमपि यथोक्तन्यायेन सम्भवदुक्तिकमेव। परमच ज्ञानस्य समाधिफलत्वेन ध्यानभक्त्योश्च तदुपायत्वेन नैकरूपः प्रकर्षः, नच सकृदुच्चरितेन वन्दतिधातुनाऽनेकप्रकारः प्रकर्ष एकदाऽनुभावयितुं शक्यः। अयं चानुशयो विवरणगतैकपरशब्दाभ्यां संसूचितः।

वस्तुतस्तु श्रुत्युक्तसमाधानपदस्य चित्तैकाग्रतासामान्यपरताया वाचस्पत्यादिसम्मततया ज्ञानध्यानभक्तीनां तदुपजीवकत्वं यथायथमविशिष्टमिति स्वानुपाधिकेच्छागोचरत्वरूपस्योपायापेक्षया फलोत्कर्षस्याबाधितत्वेन प्रकृते वन्दतिधातुना तत्प्रतिपादनं क्षोदक्षममेवेति हृदयम्॥ ५५॥

इतिसमाधानग्रन्थः।

भाग २ Vol, 2

१३२५ मिताब्दस्य ४र्थांशे
APRIL-JUNE, 1919.

संख्या २ No. 2

संस्कृत-भारती ।

आंगल-भाषा-परिशिष्ट-समेता ।

त्रैमासिकी साहित्य-पुराण-दर्शन-विज्ञानात्मिका

SAMSKRITA BHARATI

WITH AN ENGLISH SUPPLEMENT,

A QUARTERLY ANGLO-SANSKRIT MAGAZINE

OF LITERATURE, SCIENCE AND ARTS.

बंग-मद्र-विहार-उत्कल-युक्तप्रदेश-आसाम-मध्यप्रदेश-विदर्भ
वरदा-काश्मीराख्य जनपदानां महात्मभिः शासकसङ्घैः
कृपयानुमोदिता कृतसाहाय्यका च

मुंबई-पञ्जाम्बु-जनपदानां महात्मभिः राजकीयशिक्षाधिकारिभिः
कृपयानुमोदिता

कलिकाता-मुंबइ-महोसुर-विश्वविद्यावेश्माधिकारिभिः महात्मभि
कृपयानुमोदिता च

Patronised by the Governments of Bengal, Madras, U. Provinces and Oudh, Behar and Orissa,

by the Administrations of Assam, C. P. and Berar,

" " Governments of Baroda, Kashmir and Jammu.

Approved " " Education Departments of Bombay and the Punjab.

and " " Universities of Calcutta, Bombay and Mysore.

प्रकाशकाः-महामण्डलमुद्रणयन्त्राध्यक्षाः (वाराणस्याम्)

वार्षिक मूल्यम् ५) ... ... (प्रेरणव्ययसमेतम्)

Annual Subscription ... Rs. 5 (inclusive of postage)

संस्कृतभारती

सम्पादक–संघः।

महामहोपाध्यायश्रीयुक्तकालीप्रसन्नभट्टाचार्य्यविद्यारत्नः एम्० ए०

महामहोपाध्यायश्रीयुक्तलक्ष्मणशास्त्री द्राविडः।

श्रीयुक्तरमेशचन्द्रविद्याभूषण-काव्य-व्याकरण-सांख्य-वेदान्ततीर्थः

श्रीयुक्तउमाचरणवन्द्योपाध्यायः एम्० ए०।

सांख्य-सारः ।

पूर्वभागः ।

प्रथम–परिच्छेदः ।

महदाख्यः स्वयम्भूर्यो जगदङ्कुर ईश्वरः ।
सर्वात्मने नमस्तस्मै विष्णवे सर्वजिष्णवे ॥ १ ॥

सांख्यसार-विवेकप्रदीपः ।

ॐ नमो भगवते वासुदेवाय परमात्मने ।

निर्व्यापारं स्वतः शान्तं गुणैः कर्त्तारमीश्वरम् ।
प्रणम्य तन्यते देवं सांख्य-सार-प्रदीपिका ॥ १ ॥
श्रीगुरोश्चरणाम्भोज-युगलं शरणं परम् ।
सांख्यसार विवेकेऽस्मिन् विवेकैरहितस्य मे ॥ २ ॥
बालानामुपकाराय यत्नो मे सफलस्तदा ।
यदाचार्य्यसराःस्युस्ते सुखेन सांख्यवर्त्मनः ॥ ३ ॥

तत्रभवान् सकलतन्त्र-स्वतन्त्रधिषणः सांख्यप्रवचनाद्यनेकग्रन्थकृद् विज्ञानभिक्षुः परमपुरुषार्थसाधनं महर्षिकपिलप्रोक्तं सांख्यशास्त्रमतिगहनं विस्तरार्थं च मन्यमानः बालानामुपचिकीर्षया तदर्थजातं संक्षिपन् सांख्यसाराख्यं "शास्त्रैकदेशसम्बद्धं शास्त्रकार्य्यान्तरे स्थितम् । आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितः ॥" इति लक्षणसिद्धं प्रकरणम् आरभमाणः प्रारिप्सितस्य अविघ्नेन समाप्त्यादिसिद्धये अलौकिकाविगीतशिष्टाचारविषयताऽवगतस्मृत्यनुमितश्रुतिप्राप्तं महर्षिणा कपिलाचार्य्येणापि "मङ्गलाचरणं शिष्टाचारात् फलदर्शनात् श्रुतितश्चे"ति (५।१।) सूत्रेण सफलत्वेन कर्त्तव्यतया अनूदितं मङ्गलमाचरन् अभ्युपगमवादेन नित्येश्वरस्यानङ्गीकर्त्तुः महर्षिकपिलस्य मतसिद्धं हिरण्यगर्भात्मकं महत्तत्त्वोपाधिकं समष्टिसूक्ष्मबुद्धिरूपतया सर्वानुप्रविष्टं सूत्रात्मानं कार्य्येश्वरं प्रणमन् शास्त्रीयविषयादिकं दर्शयति "महदाख्य" इति । "महदाख्यः"—महत्तत्त्वोपाधिकः आदिजीवः, बुद्ध्याख्यं समष्टिमहत्तत्त्वं हि त्रिगुणात्मकम् एकमेव, तद्धि सत्त्वाद्यंशभेदेन ब्रह्मादित्रयाणां

देवानां सूक्ष्मशरीरं भवतीत्येका मूर्त्तिरित्युच्यते हरिहरात्मकदेहवत् । अनादिप्राणिकर्म्मवशतः पुरुषसंयोगात् क्षोभ्यमाणगुणेभ्यः महत्तत्त्वाख्यं प्रकृतेः प्रथमं कार्य्यम् उत्पद्यते, तदुपहितः पूर्वकल्पसिद्धः जीव एव हिरण्यगर्भाख्यः कार्य्येश्वरः, कपिलमते ईदृशेश्वर एव प्रमाणसिद्धः, नतु नित्येश्वरः, "ईश्वरासिद्धेः" १।९२। ईदृशेश्वरसिद्धिः सिद्धे"ति ३।५७। सांख्यसूत्राभ्याम् ॥

> गुणेभ्यः क्षोभ्यमाणेभ्यस्त्रयो देवा विजज्ञिरे ।
> एका मूर्त्तिस्त्रयो देवा ब्रह्मविष्णुमहेश्वराः ॥
> सात्त्विको राजसश्चैव तामसश्च त्रिधा महान् ।

इत्यादिस्मृतिप्रामाण्याच्च ।

महत्तत्त्वस्य कार्य्यत्वेन तदुपहितजीवस्यापि पराभिमतश्रोत्रवद् जन्यतया तत्कर्त्तुरपरस्यावश्यकत्वात् तस्यैवेश्वरत्वसिद्धेर्न महदाख्यस्येश्वरत्वमित्याशङ्क्याह—"स्वयम्भूरि"ति=स्वयमेव कर्त्रन्तरनिरपेक्षतया भवतीति स्वयम्भूः, नहि प्रधानस्य महदादिपरिणामे कर्त्रपेक्षाऽस्ति, कार्य्यानुकूलस्वतन्त्रप्रवृत्तिशीलत्वात् तस्य, अतः जीवचैतन्यस्य नित्यतया उपाधिभूतमहत्तत्त्वस्यापि चेतनकर्त्रनपेक्षत्वेन नान्येश्वरसिद्धिः, अपितु तस्यैव प्रकृतेः कार्य्यजननशक्तेरुद्बोधकतया ईश्वरत्वमिति भावः, एतच्चानुपदमेव स्फुटीभविष्यति ।

सांख्यप्रतिपाद्यं सकार्य्यं मूलकारणं सूचयन् जगद्रूपमहीरुहस्यैवभिव्यक्तकारणतामस्य दर्शयति "जगदङ्कुर"इति, अहङ्कारादिब्रह्माण्डान्तप्रपञ्चस्य परं परं स्वकार्य्यापेक्षया व्यक्ततरव्यक्ततमतया शाखाप्रशाखापल्लवादिमद्वृक्षसादृश्यात् तत्कारणस्यास्य अङ्कुररूपता, एतदुपादानतया च प्रधानस्य बीजरूपत्वेन मूलोपादानकारणत्वम् । उपादानकारणत्वं च समवायसम्बन्धेन कार्य्याविभागाधारत्वम्, एतेन सांख्योक्तविवेकस्य प्रतियोगिभूतं शास्त्रप्रमेयं सकार्य्यप्रधानमुक्तम् ।

अस्यैव सृष्टिस्थितिप्रलयसामर्थ्यमणिमाद्यैश्वर्य्ययोगञ्चाह,—"ईश्वर"इति, "ईश्वरः"=ऐश्वर्य्यवान्, अस्यायमर्थः,—प्रकृतिः स्वतन्त्रा पुरुषार्थम् साधयितुम् ईश्वरापराभिधेनात्मजीवेन संयुज्यते अयस्कान्तेन लोहवत्, तत्संयुक्ता च सा सृष्ट्यादौ विकारिमूलोपादानकारणम्, ईश्वरकालकर्म्मादयस्तु प्रकृतेः कार्य्यजननशक्तेरुद्बोधकाः, तथाहि,—धर्म्माधर्म्मरूपकर्म्माणि स्वधर्म्मविरुद्धधर्म्मान्तररूपावरणभङ्गेन उद्बोधकानि, आदिजीवरूपेश्वरस्तु अनादिप्राणिनिचयकर्म्मद्वारेण साम्यपरिणामादिरूपाखिलावरणभङ्गेन उद्बोधकः, प्रकृत्यादीनामविभागाश्रयश्चेति

अधिष्ठानरूपोपादानकारणम्, यत्र कार्य्यस्य कारणाविभागेनाविभागः तदधिष्ठानकारणम्, एतच्च समवाय्यसमवायिकारणाभ्यामुदासीनं निमित्तकारणेभ्यश्च विलक्षणं चतुर्थमाधारकारणम् । कालादयस्तु धर्म्माद्युद्बोधकतया निमित्तकारणम् । यथा संस्कार एव स्मृतिहेतुः सदृशपदार्थदर्शनादृष्टचिन्तादयस्तु अननुगततया संस्कारस्य उद्बोधकमात्राः, उद्बोधश्चेह निद्रादिदोषरूपावरणभङ्गः, तथा अत्राप्यवगन्तव्यम् । तथाचेश्वरस्य सृष्टिस्थितिप्रलयेषु प्रकृतेः कार्य्यजननशक्त्युद्बोधकतया प्रकृत्यादिसकलपदार्थानामधिष्ठानतया च सामर्थ्यवत्त्वम् । उक्तं चैतत् प्रतिबन्धापनये एव कारणानां सामर्थ्यम् पातञ्जलसूत्रे,—"निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवद्" । ४ । ३ । इति । स्मृतिरपीश्वरस्याधिष्ठानकारणत्वे प्रमाणम् ।

"यस्य यत् कारणं प्रोक्तं तस्य साक्षान्महेश्वरः ।
अधिष्ठानतया स्थित्वा सदैवोपकरोति हि ॥" इति ।

अस्य अणिमाद्यैश्वर्य्ययोगमप्यग्रे दर्शयिष्यति,—

"अणिमा लघिमा प्राप्तिरीशानो ज्योतिरव्ययः
ज्ञानवन्तश्च ये केचिदलुब्धा जितमन्यवः ।
विमुक्ताः सर्व एवैते महत्त्वमुपयान्त्युत ॥
विष्णुरेवादिसर्गेषु स्वयम्भूर्भवति प्रभुः ॥" इत्यनुगीतावचनेन ।

अस्य सर्वात्मकत्वं दर्शयति,—"सर्वात्मने" इति । एतत्सर्वात्मकत्वं न अद्वैतवादाभिमतैकत्वरूपम्, अपितु अविभागलक्षणम्, अविभागश्च आधारतावत् स्वरूपसम्बन्धविशेषः संयोगविशेषो वा अत्यन्तसंमिश्रणरूपः । अतः एकरूपतया विरुद्धधर्म्माभावेन सर्वात्मनां समष्टिबुद्ध्युपहितहिरण्यगर्भाभेदः सिद्धः ।

व्यापकत्वं दर्शयति 'विष्णवे" इति—विष्लृ व्याप्तौ इति धातुपाठाद् व्यापकायेत्यर्थः । व्यापकत्वं च सर्वकार्य्याविभक्तत्वम्, दुग्धाविभक्तजलवत् । तथा चोक्तम् ।

"सर्वतः पाणिपादश्च सर्वतोऽक्षिशिरोमुखः ।
सर्वतः श्रुतिमाल्लोँके सर्वं व्याप्य स तिष्ठति ॥" इति ।

अस्य सर्वोत्कर्षमाह,—"सर्वजिष्णवे" इति—सर्वत उत्कृष्टायेत्यर्थः । सर्वोत्कर्षश्च मलिनरजस्तमोऽभिभवाद् विशुद्धसत्त्वप्रधानतया प्रकृष्टज्ञानक्रियाशक्तिमत्त्वादित्यर्थः । एतेन संसारस्य मलिनात्मकतया मुमुक्षूणां ततो वैराग्यं सूचितम् ।

सांख्यकारिकया लेशादात्मतत्त्वं विवेचितम् ।
सांख्यसारविवेकोऽतो विज्ञानेन प्रपञ्च्यते ॥ २ ॥

"तस्मै"=तादृशाय श्रुतिस्मृतिप्रसिद्धाय जगदुत्पत्तिस्थितिसंहारहेतुतया सर्वोत्कृष्टाय परमात्मने । "नमः=तदुद्देश्य स्वापकर्षबोधनमित्यर्थः ।

अत्र सर्वात्मकहिरण्यगर्भस्वरूपकीर्त्तनेन विवेकस्यानुयोगिभूतः आत्मपदार्थः उक्तः, अनेन च अधिकारिसम्बन्धविषयप्रयोजनात्मकानुबन्धचतुष्टयं सूचितम् । तथाहि,—संसारदोषदर्शनाद् दिव्यादिव्यभोगवितृष्णतया वैराग्यसम्पन्नः विशुद्धचित्तः मुमुक्षुः पुरुष इह अधिकारी । मोक्षसाधनं विवेकज्ञानं विवेकस्य प्रतियोग्यनुयोगिभूतसविकारप्रधानजीवादयश्च विषयाः । शास्त्रेण विवेकज्ञानस्य प्रतिपाद्यप्रतिपादकलक्षणः, पुरुषेण प्राप्यप्रापकत्वलक्षणः मोक्षेण च साध्यसाधनलक्षणः सम्बन्धः । प्रयोजनन्तु निःश्रेयसमेवेति ॥ १ ॥

सांख्यकारिकातो विशेषप्रदर्शनेन अस्य उपयोगं दर्शयन् सामान्यतः प्रारिप्सितग्रन्थप्रमेयं प्रतिजानीते,—"सांख्यकारिकये"ति, सांख्यकारिकया=श्रीमदीश्वरकृष्णप्रणीतया, "लेशात्"=संक्षेपतः, "आत्मतत्त्वम्"=विवेकानुयोगिभूतस्य जीवात्मनः स्वरूपं, "विवेचितम्"=लक्षणप्रमाणादिभिः प्रतिपादितम्; तस्य ग्रन्थस्यातिसंक्षिप्ततया बालानां सकलसांख्यशास्त्रप्रमेयजिज्ञासूनाम् अनुपादेयत्वेन तदर्थे ममेयं प्रवृत्तिर्युज्यते इत्याशयः । "अतः"=कारिकाग्रन्थस्यातिसंक्षिप्तत्वात् । "सांख्यसारविवेकः"=इति । "सांख्यसारः"=सांख्यशास्त्रस्य सकलसिद्धान्तानां सारः=निष्कर्षः, तस्य विवेकः=विशेषतः विवेचनं, प्रमाणाद्युपन्यासेन परीक्षणमिति यावत् । सांख्यशब्दस्य व्युत्पत्तिश्चोक्ता शास्त्रेषु "संख्या=सम्यग् विवेकेन आत्मकथनं, सा अस्ति विचारणीयत्वेन यत्र तत् सांख्यम्", अथवा—"पञ्चविंशतितत्त्वानां संख्या विचारः, तमधिकृत्य कृतं शास्त्रं सांख्यम् ।" "सम्यक् क्रमपूर्वकं ख्यानं कथनं यस्यां सा संख्या, क्रमपूर्वा विचारणा, यत् तामधिकृत्य कृतं तस्मात् सांख्यमित्युच्यते शास्त्रम् ।" उक्तं च मोक्षधर्मे,—

"संख्यां प्रकुर्वते सांख्याः प्रकृतिं च प्रचक्षते ।
तत्त्वानि च चतुर्विंशत् तेन सांख्या इति स्मृताः" ॥

"विज्ञानेन"=तदाख्येन ग्रन्थकर्त्रा, "प्रपञ्च्यते"=विस्तरतः कथ्यते । इति प्रतिज्ञा, तदर्थस्तु उत्तरकालकर्त्तव्यत्वप्रकारकबोधानुकूलवचनम् इति ॥ २ ॥

प्रायः सङ्कलिता सांख्य-प्रक्रिया कारिकागणे ।
साऽतोऽत्र वर्ण्यते लेशात् तदनुक्तांशमात्रतः ॥ ३ ॥
सांख्यभाष्ये प्रकृत्यादेः स्वरूपं विस्तरान्मया ।
प्रोक्तं तस्मात् तदप्यत्र संक्षेपादेव वक्ष्यते ॥ ४ ॥

सांख्यकारिकयाऽस्य गतार्थतां, तस्या न्यूनतां च परिहरन् विशेषतः प्रतिजानीते, "प्राय" इति "कारिकागणे" ईश्वरकृष्णप्रोक्ते । "प्रायः"=बाहुल्येन, परपक्षखण्डनप्रपञ्चादिकं विना । "सांख्यप्रक्रिया"=सांख्यशास्त्रोक्तसृष्ट्यादिप्रणाली, मोक्षतत्साधनादिप्रकारश्च, "संकलिता"=संगृहीता, तत्र कण्ठतः अनुक्ता अपि पदार्थाः शब्दादिसामर्थ्यात् सूचिताः, अतः तस्यां सांख्यीयाः सर्वे एव पदार्थाः संगृहीता इति बोध्यम् । "अतः"=कारिकायां शब्दतः सकलार्थप्रतिपादनाभावात्, "अत्र"=सांख्यसारे । तत्र साक्षात् शब्देन अनुक्तान् अंशान् साकल्येन आश्रित्य "सा"=सांख्यप्रक्रिया । "लेशात्"=परपक्षखण्डनादिबहुप्रयासं विहाय, "वर्ण्यते"=सांख्यकारिकायां सूचितान् पदार्थान् शब्दतः उल्लिख्य युक्तिप्रमाणादिभिः विशेषतः विचार्य्य निर्णीयते इत्यर्थः । एतेन बाहुल्यवर्जनात् कण्ठतः सकलशास्त्रप्रमेयोक्तिश्च बालानामस्योपादेयत्वमप्युक्तम् ॥ ३ ॥

स्वकृतप्रवचनभाष्येणास्यागतार्थत्वं प्रतिपादयन् विशेषतः प्रतिज्ञामुपसंहरति,—"सांख्यभाष्ये" इति । सांख्यभाष्ये कपिलप्रोक्तषडध्यायीसूत्राणां स्वकृते भाष्ये ; भाष्यलक्षणमुक्तम्,—

"सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः ।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुरिति ।"

"मया"=एतद्ग्रन्थप्रणेत्रा विज्ञानभिक्षुणा । "प्रकृत्यादेः"=आदिशब्देन महदादीनां पुरुषाणां च संग्रहः । "स्वरूपम्"=असाधारणरूपम्, एतद् लक्षणप्रमाणादीनामुपलक्षणम् । "विस्तरात्"=बाहुल्यतः, अनेन अवान्तरविषयाणां परपक्षखण्डनस्वपक्षमण्डनादीनां संग्रहः । "प्रोक्तम्"=प्रकर्षेण विचारपूर्वकम् उक्तम् । अतः अवान्तरपदार्थानां विचाराणां च बाहुल्यात् तद्भाष्यं परिणतमतीनामेव उपादेयं, नतु कोमलमतीनां बालानाम् । "तस्मात्"=बालकैः प्रवचनभाष्यस्यानुपादेयत्वात्, "तत्"=तत्र प्रोक्तं प्रकृत्यादेः स्वरूपादिकम् । "अत्र"=सांख्यसारे । "संक्षेपादेव"=अवान्तरपदार्थविचारपरपक्षखण्डनादिबाहुल्यं परि-

आत्मानात्मविवेकसाक्षात्कारात् कर्तृत्वाद्यखिलाभिमाननिवृत्त्या तत्कार्य्यरागद्वेषधर्म्माधर्म्माद्यनुत्पादात् पूर्वोत्पन्नकर्म्मणां चाविद्यारागादिसहकार्य्युच्छेदरूपदाहेन विपाकानारम्भकत्वात् प्रारब्धसमाप्त्यनन्तरं पुनर्जन्माभावेन त्रिविधदुःखात्यन्तनिवृत्तिरूपो मोक्षो भवतीति श्रुतिस्मृतिडिण्डिमः । (क)

त्यज्य सारं संगृह्य च "वक्ष्यते"—लक्षणप्रमाणादिभिः बोधयिष्यते । इति विशेषतः प्रतिज्ञा ॥ ४ ॥

तत्र ससाधनं परमपुरुषार्थभूतं मोक्षं निरूपयन् आदौ तत्साधनं निरूपयति,—'आत्मानात्मे"ति । "आत्मा"—जीवः—अहन्त्वेन प्रतीयमानः चेतनपदार्थः, "अनात्मा"—आत्मव्यतिरिक्तः प्रकृत्याद्यचेतनवर्गः, तयोः "विवेकसाक्षात्कारः"—प्रकृतेर्भिन्नोऽहमित्येवंरूपः, स च मानसप्रत्यक्षात्मकम् प्रकृतिप्रतियोगिकात्मानुयोगिकभेदप्रकारकज्ञानम्, स एव मोक्षस्य कारणम् । विवेकज्ञानाद् मोक्षोत्पत्तौ अवान्तरव्यापारान् आह,—"कर्त्तृत्वादी"ति, आदिपदेन जीवात्मनि प्रतीयमानानां सुखदुःखप्रभृत्यादिप्राकृतधर्म्माणां ग्रहणम् । प्रकृतिर्हि त्रिगुणात्मकतया सुखदुःखपरिणामधर्म्मिणी ; ततो विवेकाग्रहणात् तान्प्राकृतान् धर्म्मान् 'अहं कर्त्ता, भोक्ता, सुखी, दुःखी"त्यादिरूपेण पुरुष आत्मनि अभिमन्यते, विवेकसाक्षात्काराच्च तादृशाभिमाननिवृत्त्या आत्मनः सुखदुःखादीनाम् आत्यन्तिकनिवृत्तिरूपः चित्स्वरूपेणावस्थानलक्षणो मोक्षः सम्पद्यते ।

ननु तादृशविवेकज्ञानसम्पन्नस्यापि विदुषः भिक्षाटनादिरूपे लौकिकव्यवहारे लोकसंग्रहार्थकवैदिककर्म्मादौ च प्रवृत्तिर्दृश्यते, प्रवृत्तौ च स्वीयसुखादिसाधनताज्ञानं कारणम्, परसुखादिषु तत्साधने वा हानोपादानादर्शनात्, तथाच विवेकज्ञाने सति सुखादीनामनात्मधर्म्मतया विज्ञाने तेषु स्वीयत्वज्ञानाभावाद् विदुषां कर्म्मादौ कथं प्रवृत्तिः स्यादिति चेदुच्यते,—सांख्यसिद्धान्ते आत्मव्यतिरिक्तानां सर्वेषामेव पदार्थानां सुखदुःखमोहात्मकतया सम्मतत्वाद् वाह्यधनादिरूपसुखानाम् आत्मसमवेतत्वाभावेऽपि यथा स्वभोग्यत्वेन स्वीयत्वमुच्यते, नतु नैयायिकादिवत् स्वसमवेतत्वं स्वभोग्यत्वञ्चाङ्गीक्रियते, एवमात्मनः उपाधिभूतबुद्ध्यादिषु वर्त्तमानानां सुखादीनामपि स्वभोग्यत्वेन स्वीयत्वम् । तथाच तत्साधनेऽपि स्वीयत्वज्ञानात् प्रवृत्तिर्नानुपपन्ना । विवेकज्ञाने जाते बुद्ध्यादिवृत्तिसुखादी-

नाम आत्मना असम्बन्धविज्ञानात् कथं स्वभोग्यत्वमित्यपि न वाच्यम्, स्वभोग्यत्वं हि स्वसाक्ष्यत्वं, साक्ष्यत्वं च उपाधिवृत्तिविषयत्वं विना भास्यत्वम्, तथाच बुद्धिवृत्तिसुखादीनाम् आत्मनि बुद्धिवृत्तिविषयतां विना—साक्षात् प्रतिबिम्बनाद् आत्मनः तत्साक्षात्काररूपः गौणो भोगः। बुद्धेर्भोगस्तु मुख्य एव, सर्ववस्तूनां सुखदुःखमोहात्मकत्वाद् विषयगतसुखदुःखाभ्यां स्वाकारेण परिणामेन बुद्धिगतसुखदुःखयोः पोषणरूपः। दुग्धमाधुर्यस्येव शर्करामाधुर्येण पोषणम्। योगिनामीश्वरस्य च परसुखादीनां बुद्धिवृत्तिविषयतयैव भानाद् न तत्र स्वसाक्ष्यत्वरूपभोग्यत्वम्। विदुषस्तु स्वबुद्धिवृत्तिसुखादीनाम् आत्मनि प्रतिबिम्बनात् तत्र स्वसाक्ष्यत्वरूपगौणभोग्यत्वसत्त्वात् स्वीयत्वमस्त्येव। एवमुपाधिवृत्तिकृतिसाध्यतादौ ज्ञानिनः स्वकृतिसाध्यताज्ञानमप्युपपद्यते। तेषामपि आत्मनि साक्षात् प्रतिबिम्बनात्। संस्कारादौ धनादौ च स्वीयसुखादिसाधनत्वाद् आत्मनः स्वीयत्वम्। नतु साक्षात्प्रतिबिम्बनात्।

नन्वेवमुपाधिभूतबुद्ध्यादिवृत्तिसुखादौ स्वीयत्वज्ञाने कथं "नाहं सुखी"-त्यादिविवेकज्ञानमुपपद्यते? इति चेदुच्यते,—समवायसम्बन्धेनाहं सुखीत्यादिप्रत्ययस्यैवाविद्यात्वेन समवायसम्बन्धावच्छिन्नतदभावप्रत्ययस्यैव विवेकशब्दार्थत्वाद्, विवेकिनः बुद्ध्यादिवृत्तितादृशस्वीयसुखादेः भाने सत्यपि तस्य आत्मनि समवायसम्बन्धेन भानाभावाद् नानुपपन्नं तादृशविवेकज्ञानमित्यदोषः। किंच तथाविधसुखादिज्ञानकालेऽपि अविकारितया बुद्ध्यादिभ्य आत्मनो विवेचनाददोषः। तस्माद् विदुषामपि स्वीयसुखादिसाधनताज्ञानं स्वोपाधिरूपबुद्ध्यादिप्रवृत्तेः हेतुर्भवत्येव। उपाधिप्रवृत्त्या च नात्मनः विकारादिदोषप्रसक्तिः।

ननु तथापि देहेन्द्रियादिभिः सम्बन्धाभावाद् विदुषां कथं प्रवृत्तिः? नहि असङ्गस्य आत्मनः देहादिभिः अभिमानातिरिक्तः सम्बन्धः सम्भवति, तथाच अभिमाननिवृत्तौ चेतनसम्बन्धाभावेन जडदेहादौ प्रवृत्त्यसम्भवादिति चेद् न, विदुषां ज्ञानोपपत्त्यर्थम् असङ्गवाक्यैर्लेपाख्यस्य विकारहेतुसंयोगस्यैव निषेधाद्, नतु पुष्करपत्रे जलस्येव असङ्गेऽपि चेतने स्वोपाधेः संयोगविशेषः प्रतिषिध्यते, स च संयोगविशेषः प्रारब्धक्षयादेव नश्यतीति दिक्। विस्तरस्तु द्वितीयपरिच्छेदे वक्ष्यते। वाचस्पतिमिश्रपादास्तु विवेकिनोऽपि प्रारब्धवशाद् बाधिताविद्यासंस्कारानुवृत्त्या ज्ञानादिव्यवहारः इत्याहुः। तन्मते असङ्गस्यात्मनः आभिमानिकसम्बन्धातिरिक्तः सम्बन्ध एव नोपेयते, स च अनादिभोग्यभोक्तृत्व-

योग्यत्वलक्षणः । अन्यथा संयोगाङ्गीकारे परिणामित्वापत्तेः, संयोगरूपधर्म्मान्तरोत्पादे धर्म्मिणो विकारावश्यम्भावात् ।

ननु तथापि रागद्वेषादिभिः प्रवृत्तेः ततश्च धर्म्माधर्म्मादीनां सम्भवात् कथं न ततः पुनर्दुःखाद्युत्पत्तिरित्यत आह,—"तत्कार्य्य"ेति । तच्छब्देन अविवेकजन्यकर्तृत्वाद्यभिमानः परामृश्यते । सुखानुशयी="रागः", दुःखानुशयी="द्वेषः" । "धर्म्माधर्म्म"पदेन=कर्म्मजन्यशुभाशुभसंस्कार उच्यते । "अनुत्पाद"शब्देन अनागतावस्थया अवस्थानमुच्यते । अस्यायमाशयः,—विवेकसाक्षात्काराद् अविवेकाख्याऽविद्या निवर्त्तते, अविद्या च अस्मितारागद्वेषादौ कारणम्, "अविद्या क्षेत्रमुत्तरेषा"मिति पातञ्जलसूत्रात् । ततश्च मूलभूताविद्यानिवृत्त्या तत्कार्य्यभूतानाम् अस्मितारागद्वेषाभिनिवेशाख्यक्लेशानाम् अनुत्पादः, रागद्वेषाद्यनुत्पत्तौ प्रवृत्त्यभावेन धर्म्माधर्म्मादेरनुत्पादः ततश्च कारणाभावेन न पुनरुत्पत्तिर्दुःखादीनाम् । इति ।

ननु भवतु धर्म्माधर्म्माद्यनुत्पत्तिः, पूर्वोत्पन्नकर्म्मणामेव सुखदुःखादिजनकत्वं भविष्यतीत्यत आह,—"पूर्वोत्पन्नकर्म्मणाञ्चे"ति । "ज्ञानाग्निः सर्वकर्म्माणि भस्मसात् कुरुतेऽर्जुन" इत्यादि स्मृतिप्रामाण्याद् विवेकज्ञानस्य कर्म्मदाहकत्वं सिद्धम्, "दाहः"=सहकार्य्युच्छेदेन फलदानासामर्थ्यम्, तथाच मूलभूताविद्यानाशेन क्लेशरूपसहकार्यभावेन प्राचीनकर्म्मणां जात्यायुर्भोगरूपविपाकारम्भाभावाद् न ततः पुनः सुखदुःखाद्युत्पत्तिः, तथाच पातञ्जलसूत्रम् "सति मूले तद्विपाकः जात्यायुर्भोगा" इति ।

ननु विवेकज्ञानस्य कर्म्मदाहकत्वे कर्म्मणामेव देहारम्भकत्वाद् भोगद्वारेण स्थितिप्रयोजकत्वाच्च तदभावे ज्ञानोत्पत्त्यणे एव देहपातापत्तिः ततश्च जीवन्मुक्तिप्रतिपादकश्रुतिर्बाधिता स्यादित्यत आह,—"प्रारब्धसमाप्त्यनन्तर"मिति=यानि खलु कर्म्माणि स्वशक्त्या स्थूलदेहसम्बन्धरूपं जन्म आरभ्य आयुर्भोगौ जनयन्ति तानि प्रारब्धकर्म्माणि उच्यन्ते, तेषां समाप्त्यनन्तरं=प्रारब्धकर्म्मजन्यचरमभोगनिष्पत्त्युत्तरम्; अस्यायमर्थः,—ज्ञानेन क्लेशाख्यसहकार्य्युच्छेदद्वारेण कर्म्मणां दाहे सत्यपि प्रारब्धकर्म्मकार्य्यस्य विपाकस्य विवेकज्ञानात्पूर्वमेव जनितत्वाद् न तद्दाहे विपाकस्य नाशः, आरब्धाङ्कुरस्य बीजस्य दाहे अङ्कुराविनाशवत् । भोगेन तु विपाकसमाप्त्यनन्तरं कृतभोगापवर्गतया कृतार्थायाः बुद्धेः प्रतिलोमपरिणामेन प्रकृतौ लयात् तद्धर्म्माणां कर्म्मणामपि लयः, अतः प्रारब्धकर्म्मणां दाहे सत्यपि यावद्विपाकं देहस्थितेरावश्यकतया न जीवन्मुक्ति-

तत्र श्रुतयः,–अथाकामयमानो योऽकामः निष्कामो न तस्य प्राणा उत्क्रामन्तीहैव समवलीयन्ते । (बृ ४ । ४ । ६)

श्रुतेर्बाधः, नापि ज्ञानोत्तरक्षणे देहपातापत्तिः नवा कर्म्मदाहानुपपत्तिः । "नाभुक्तं क्षीयते कर्म्म कल्पकोटिशतैरपी"त्यादिस्मृतिवाक्यानि च भोगस्य कर्म्मनाशकत्वे प्रमाणम् ।

ननु तथापि त्रिगुणात्मिकायाः प्रकृतेः पुरुषार्थं प्रवृत्तिशीलत्वाद् विद्या-वरणात्मकतमसः नित्यत्वाच्च पुनरपि जन्मादि भविष्यतीत्यत आह,– "पुनर्जन्माभावेन" इति । कृतार्थं पुरुषं प्रति प्रकृतेः प्रवृत्त्यभावात् तमसो नित्यत्वेऽपि अविवेकाभावेनाकार्य्यकारितया न पुनः संसारारम्भकत्वम् । तथाच पातञ्जलसूत्रम्, "कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वादि"ति । मोक्षस्य स्वरूपमाह,–"त्रिविधे"ति आध्यात्मिकाधिदैविकाधिभौतिकभेदेन दुःखं त्रिविधं, शारीरमानसिकयोराध्यात्मिकत्वेन संग्रहादेकत्वम् । शारीरं–वात-पित्तश्लेष्मणां वैषम्यनिमित्तम्, मानसिकं–कामक्रोधादिजनितम् । यद्यपि सर्वमेव दुःखं मानसं तथापि मनोमात्रजन्यत्वाजन्यत्वाभ्यां मानसत्वामानसत्व-विभागः । आधिदैविकं–यक्षभूतादिजनितम्, आधिभौतिकम् पशुपक्ष्यादि-जनितम् । तेषां दुःखानामात्यन्तिकनिवृत्तिरेव मोक्षः । निवृत्तेरात्यन्तिकत्वं च–निवृत्तस्य पुनरनुत्पादः, तच्च न्यायमते स्वसमानाधिकरणदुःखदुःखप्रागभावा-समानकालीनदुःखध्वंसः, स्वसमानकालीनदुःखासमानकालीनत्वे सति स्वसमा-नाधिकरणदुःखप्रागभावासमानकालीनत्वमिति तदर्थः । चरमदुःखक्षणे तत्पूर्व-दुःखध्वंसे अतिव्याप्तिवारणाय सत्यन्तदलम्, सुषुप्त्याद्यवस्थायां स्वसमानाधि-करणदुःखसामान्याभावकाले यत्किञ्चिद् दुःखनिवृत्तौ अतिव्याप्तिवारणाय विशेष्यदलम् । स्वमते तु ध्वंसप्रागभावयोरनङ्गीकारात् तत्पुरुषीयदुःखाविर्भा-वसमानकालीनभिन्नतत्पुरुषीयदुःखतिरोभावः इति । ईदृशमोक्षसत्त्वे किं प्रमाणम् इत्यतः आह,–"श्रुतिस्मृतिडिण्डिम"इति । श्रुत्यादयस्तु अनुपदमे-वोदाहरिष्यन्त इति । (क)

उक्तार्थे श्रुतीरुदाहर्त्तुमुपक्रमते "तत्र श्रुतय"इति । "तत्र"–मोक्षविषये । "श्रुतयः"–प्रमाणभूतोपनिषद्वाक्यानि । रागाद्यभावे कर्म्मणां फलाजनकतया मोक्षोपपत्तौ बृहदारण्यकश्रुतिमुदाहरति,–"अथाकामयमान" इति–पूर्वं काम-

आत्मानं चेद्विजानीयादयमस्मीति पूरुषः ।
किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत् ॥ (बृ ४।४।१२ ॥) (ख)

यमानः संसरतीत्युक्तम्, "अथ" शब्दो हेतौ, अथ=तस्मात् कामनाया एव संसारकारणत्वाद् इत्यर्थः । "अकामयमानः"=कर्मफलरूपलोकाद्येषणारहितः, न क्वचित् संसरति=देहान्तरं गच्छतीत्यर्थः । फलासक्तस्य हि फलभोगाय अर्चिरादिमार्गेण धूमादिना वा गतिर्भवति, अकामस्य क्रियानुपपत्तेः अकामयमानः मुच्यते एव । कथं पुनरकामयमानो भवतीत्यत आह,—"योऽकाम" इति=यः अकामो बाह्येषु शब्दादिषु विषयेषु आसङ्गरहितो भवति असौ अकामयमानः । कथम् अकामता इत्यपेक्षायामाह,—"निष्काम" इति यो निष्कामः, यस्मात् निर्गताः वासनारूपाः कामाः, आत्मनो दुःखाद्यसंसर्गविज्ञानात्, सोऽयं निष्कामः । तस्य किं स्यात् इत्याह,—"तस्य प्राणा" इति प्राणाः वागादयः न उत्क्रामन्ति नोर्द्ध्वम् क्रामन्ति देहात्, ते इहैव समवलीयन्ते स्वाश्रयबुद्धिलयाल्लयं प्राप्नुवन्ति इत्यर्थः ।

विवेकेनात्मज्ञानस्य रागादिनाशद्वारेण दुःखनिवृत्तिरूपमोक्षोपयोगं दर्शयितुं श्रुतिमुदाहरति । "आत्मानं चेदि" ति "आत्मानं"=स्वात्मस्वरूपं चेद्=यदि, विजानीयात्=प्रकृत्यादिप्रतियोगिकभेदानुयोगितया साक्षात्कुर्य्यात्, सहस्रेषु कश्चिदिति शेषः । "चे" दित्यनेन आत्मविद्याया दुर्लभत्वं दर्शितम् । केन रूपेण विजानीयादित्यत आह,—"अयमस्मी" ति,—अयमहं प्रकृत्यादिभ्यः पृथगस्मीति । ईदृशसाक्षात्कारस्य फलं दर्शयति "किमिच्छन्" इति, तदा "किमिच्छन्"=आत्मनः असङ्गतया कामनाविषयादिसम्बन्धाभावेन कामनाभावं पश्यन्नित्यर्थः । अत्र "किं" शब्दः आक्षेपार्थकः । कामनाया विषयाभावमुक्त्वा फलाभावं दर्शयति,—"कस्य कामाये" ति । कस्य कामाय=कस्य प्रयोजनस्य साधनाय इत्यर्थः । आत्मसम्बन्धिप्रयोजनस्याप्यभावादित्यर्थः । ततश्च दुःखाद्यभावं दर्शयति शरीरमिति । "शरीरम् अनु संज्वरेत्,"=शरीरोपाधिकृतं दुःखम् अनु दुःखी स्यात्, नहि विदुषः किमपि कामनाविषयः तत्फलं चास्ति, अविवेकी हि आत्मनि प्रकृतिधर्म्मान् आरोपयन् तद्विकारान् सुखादीन् प्रेप्सुः "ममेदं स्यात्" "पुत्रस्य इदम्" "भार्य्याया इदम्" इत्येवमीहमानः पुनः पुनर्जन्ममरणप्रबन्धारूढः शरीररोगमनुरुज्यते, विवेकदर्शिनस्तु तदसम्भव इत्यर्थः । (ख)

यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः ।
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ॥ (बृ। ४।४।७) (ग)

कामान् यः कामयते मन्यमानः
स कामभिः * जायते तत्र तत्र ।
पर्य्याप्तकामस्य कृतात्मनस्तु
इहैव सर्वे प्रलीयन्ति कामाः ॥ मुण्ड ॥ ३२ । २ ॥ (घ)

रागाद्यभावे आत्मस्वरूपेणावस्थितिलक्षणामुक्तिसिद्धौ श्रुतिमुदाहरति,–"यदा सर्वे"इति । यदा=यस्मिन् ज्ञानकाले । अस्य प्रसिद्धस्य पुरुषस्य । "ये"=प्रसिद्धा लोके इहामुत्रार्थाः पुत्रवित्तलोकैषणालक्षणाः कामाः । "हृदि,"=बुद्धौ,–"श्रिताः"=आश्रिताः, तत्परिणामभूता इति यावत्, ते "सर्वे"=समस्ताः "कामा"=तृष्णाप्रभेदाः, प्रमुच्यन्ते=प्रकृतेः पृथक्तया विज्ञानात् समूलतो विशीर्य्यन्ते, प्रकृतेरधिकारनिवृत्त्या फलाजनकतया स्वकारणे समवलीयन्ते इति यावत्; यतः तावद्धि प्रकृतेः चेष्टितम् यावन्न पुरुषः आत्मानं ततो विवेकेन साक्षात्करोति, कृते तु साक्षात्कारे तं पुरुषं प्रति प्रकृतेः विकाराजननात् तत्पुरुषीयबुद्ध्यादयः प्रतिलोमपरिणामक्रमेण प्रकृतौ लीयन्ते, बुद्ध्यादिलयात् तद्धर्म्मा अपि कामादयः नश्यन्तीत्यर्थः । "कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मनः एवे"ति श्रुतेः कामादीनां बुद्धिधर्म्मत्वम् । "मनः" शब्देनात्र बुद्धिरुच्यते । कामनाशे आत्मनः स्वरूपेणावस्थानलक्षणा मुक्तिः सिध्यतीत्याह,–। "अथ"इति । "अथ"=कामलयात् । तदा "मर्त्यः"=मरणधर्म्मा सन् कामवियोगात् "अमृतो भवति"=यतः अनात्मविषयाः कामाः अविद्यालक्षणाः मृत्यवः, अतः मृत्युवियोगे विद्वान् जीवन्नेव अमृतो भवति । "अत्र"=अस्मिन्नेव शरीरे विद्यमानः ब्रह्म समश्नुते, चितिस्वरूपेणावस्थानलक्षणं मोक्षं प्रतिपद्यते इत्यर्थः ॥ अत्रेदमवगन्तव्यम्,–ज्ञानकाले प्रकृतेरधिकारसमाप्त्या लयोन्मुखिनी अपि बुद्धिः कञ्चित्कालं प्रारब्धवशतः अवतिष्ठते, तया च जीवन्मुक्तस्य व्यवहारः सम्पद्यते इति । (ग)

मुमुक्षोः कामत्यागः एव प्रधानं साधनम् इत्येतद् दर्शयितुं श्रुतिमुदाहरति,–"कामान् य"ति, यः विषयासक्तचेता जनः "कामान्"=दृष्टादृष्टविषयान् "मन्यमानः"=प्राकृतधर्म्मान् आत्मनि अभिमन्यमानः आत्मना असम्बद्धान् अपि

* कर्म्मभिरिति पाठान्तरम् ।

इत्याद्याः, स्मृतयश्च कौर्म्माद्याः, यथा कौर्म्मे,—

रागद्वेषादयो दोषाः सर्वे भ्रान्तिनिबन्धनाः ।
कार्य्यो ह्यस्य भवेद्दोषः पुण्यापुण्यमिति श्रुतिः ॥
तद्वशादेव सर्वेषां सर्वदेहसमुद्भवः । इति ।

सुखादीन् शब्दादिविषयान् स्वीयत्वेन स्वसम्बद्धतया जानन्, "कामयते"="प्रार्थयते' तेषु रागवान् भवति, उपघातशङ्कया च उपघातकान् द्वेष्टि, नाशभयेन च मोहम् आपद्यते, स तैः "कामभिः"=कामैः धर्म्माधर्म्मप्रवृत्तिहेतुभिः विषयेच्छारूपैः सह जायते, "तत्र तत्र"यत्र यत्र विषयप्राप्तिनिमित्तं कामाः कर्म्मसु पुरुषं नियोजयन्ति, तेषु तेषु विषयेषु तैरेव कामैः वेष्टितो जायते । यस्तु विवेकज्ञानेन "पर्य्याप्तकामः"=कामनाविषयसंसर्गाद्यभावाद् आत्मनः बाह्यकामाभावेन स्वात्मन्येव परितृप्तः, तस्य पर्य्याप्तकामस्य कृतात्मनः"=अविवेकेन आरोपितात् प्राकृतरूपादपनीय स्वेन रूपेण कृतः=सम्पादितः, पूर्वं तु स्वरूपेणावस्थितोऽपि अविवेकात् न तथा प्रतीतः, इदानीं विवेकेन तथा प्रतीतेः कृतत्वमात्मनः उपचर्य्यते । आत्मा=स्वस्वरूपं यस्य तस्य कृतात्मनः, इहैव तिष्ठत्येव शरीरे सर्वे धर्म्माधर्म्मप्रवृत्तिहेतवः कामाः "प्रविलयन्ति"=प्रविलीयन्ते=विलयमुपयान्ति=नश्यन्तीत्यर्थः । कामाः स्वजन्महेतुविनाशाद् न जायन्ते इत्यर्थः ॥ (घ)

न केवलम् उदाहृता एव श्रुतयः, अन्या अपि सन्तीत्याह,—"इत्याद्याः"=ताश्च "अथो खल्वाहुः काममय एवायं पुरुषः इति स यथाकामो भवति तत्क्रतुर्भवति तत्कर्म्म कुरुते, यत्कर्म्म कुरुते तदभिसम्पद्यते" इत्यादिश्रुतयः आकरे द्रष्टव्याः ।

रागद्वेषादिदोषाणां भ्रान्तिजन्यत्वे जन्मादिकारणत्वे च स्मृतिवाक्यमुदाहरति,—"रागद्वेषादय"इति=सर्वे रागद्वेषादयो दोषाः भ्रान्तिनिबन्धनाः अविवेककारणका इत्यर्थः । "हि"=यतः,"पुण्यापुण्यम्"=कारणे कार्य्योपचारात् पुण्यापुण्यजनकः दोषः=रागादिः, अस्य=भ्रान्तिरूपाविवेकस्य कार्य्यः तज्जन्य इत्यर्थः । "तद्वशादेव"=पुण्यापुण्यजनकरागद्वेषादिदोषवशात् एव सर्वेषां दिव्यनारकतिर्य्यगादिदेहानां समुद्भवः । अत्रायं क्रमः बोध्यः, संसारस्यानादितया प्राग्भवीयाविवेकसंस्काराद् आदौ अनात्मादौ आत्माद्यभिमानलक्षणाऽविद्या उत्पद्यते, ततः दृग्दर्शनशक्त्योरेकतात्मत्यय लक्षणा अस्मिता भवति, ततः विषयेषु इष्टद्विष्टत्व-

मोक्षधर्म्मे च,—

इन्द्रियाणीन्द्रियार्थाश्च नोपसर्पन्त्यतर्षुलम् ।
हीनश्च करणैर्देही न देहं पुनरर्हति ॥

तस्मात् तर्षात्मकाद् रागाद् बीजाज् जायन्ति जन्तवः । इति । (ङ)

ननु रागाभावेऽपि केवलकर्म्मवशाद् नरकादिप्राप्तेः कथं रागस्य कर्म्मसहकारित्वं विपाकारम्भे उपपन्नम्? नरकादौ विशेषतो रागाभावेऽपि सामान्यतोरागसत्त्वात् । निषिद्धस्त्र्यादिगामिनां स्त्र्यादिरागादेव तप्तलोहमय-

---

ज्ञानाद् रागद्वेषाभिनिवेशाः समभिजायन्ते । तद्वशात् कर्म्मसु प्रवृत्तिः, कर्म्मभ्यः शुभाशुभादृष्टानि, तेभ्यश्च देहान्तरसम्बन्धः इति ।

तृष्णात्मकरागाभावे इन्द्रियादीनामप्रवृत्तौ जन्माभावे, रागस्य जन्महेतुत्वे च भीष्मोपदेशात्मकं महाभारतीयवाक्यमुदाहरति,—"इन्द्रियाणी"ति 'इन्द्रियाणि"—चक्षुरादीनि, "इन्द्रियार्थाः"—शब्दादयः, "अतर्षुलं"—तृष्णाहीनं, विषयरागादिरहितमित्यर्थः न "उपसर्पन्ति"—न स्वविषयज्ञानं जनयन्ति, निवृत्तविषयरागस्य अत एव विषयेभ्यः प्रत्याहृतस्य मनसः विषयाकारपरिणामाभावात् तदनुकारिणामपीन्द्रियाणां न विषयैः सम्बन्धोभवति, इन्द्रियविषयसंयोगाभावाच्च न तज्ज्ञानमुपजायते इत्यर्थः । "करणैः हीनः"—इन्द्रियैः विरहितः, प्रत्याहृतचित्तस्य इन्द्रियाणां विषयासम्बन्धेन ज्ञानाजनकतया अर्थक्रियाकारित्वाभावेन असत्कल्पतया इन्द्रियैः हीनः इत्युक्तम् । "देही"—जीवः "पुनर्देहं"—जन्मान्तरम्, 'न अर्हति"—न प्राप्नोति। तस्मात् रागादेर्जन्महेतुत्वात् "तर्षात्मकात्"—रागरूपाद् बीजात्—कारणात् "जन्तवः"—प्राणिनः । "जायन्ति"—जायन्ते—देहान्तरमापद्यन्ते इत्यर्थः । (ङ)

पूर्व्वम् "अविद्यारागादिसहकार्य्युक्तेत्यरूपदाहेने"ति ग्रन्थेन कर्म्मणां विपाकारम्भे अविद्यारागादेः सहकारिता उक्ता, सहकारित्वं च तज्जन्यजनकत्वम्, कर्म्मजन्यविपाकारम्भे रागस्यापि जनकतया तेषां तत्सहकारित्वम् । अत्र शङ्कते,—"नन्वि"ति, भवतु स्वर्गादिफलककर्म्मणां फले स्वर्गादौ स्वर्गकामस्याधिकारिणः स्वर्गोमे सुखसाधनमित्यादिरूपसुखानुशयिरागसत्त्वात् कर्म्मजन्ये स्वर्गादिभोगानुकूलविपाकारम्भे पूर्व्वोक्तश्रुतिस्मृतियुक्त्यादिप्रामाण्याद् रागस्यापि कारणतया सहकारिता, नरकादिप्रापककर्म्मणां फलभूते नरकादौ इष्टसाधनताज्ञानरूपरागाभावात् कथं तत्र रागस्य सहकारितेति शङ्काग्रन्थार्थः । "रागाभावे"—फले इष्ट-

नारीसमालिङ्गनादिरूपनरकोत्पत्तेः । (च) यद्यप्यविद्यास्मितारागद्वेषभयाख्यं क्लेशपञ्चकमेव जन्मादिविपाकारम्भे कर्म्मणां सहकारि भवति,—

साधनताज्ञानामस्त्वे । "अपि"शब्दः=विरोधसूचकः । "केवलकर्म्मवशात्"=रागादिविरहितादृष्टवशाद्, अत्र कर्म्मशब्देन कर्म्मजन्यमदृष्टं लक्ष्यते, "केवल"शब्देन रागादिव्यावृत्तिः । "नरकादिप्राप्तेः"=दुष्टभोगजनकविपाकारम्भाद् हेतोः, "कथं"शब्दः=आक्षेपे, न इत्यर्थः । "विपाकारम्भे"=नारकजात्यायुर्भोगारम्भे । "उपपन्नं"=युक्तिमत् । रागस्य तादृशविपाकारम्भे प्रमाणं नास्तीति अक्षरार्थः शङ्कावाक्यस्य । अत्रोत्तरमुच्यते,—"नरकादावि"ति । रागस्य सामान्यरूपेणैव विपाकारम्भे कारणता, नतु विशिष्टफलरागस्यैव । अत्रापि नारकजात्यादिफलककर्म्मणः प्रवृत्तिविषयपरदारादिविषयकरागजन्यत्वाद् न विहन्यते रागस्य कारणतेति प्रतिवचनार्थः । अनेनैतदुक्तं भवति,—सामान्यरागस्यैव अदृष्टद्वारा जात्यारम्भादौ कारणता, न विशिष्टफलरागादेः, गौरवाद्, अनिष्टापाताच्च । विशिष्टस्य सामान्येऽन्तर्भावात् तत्तद्विशिष्टरागस्यापि कारणता सिध्यति । माघप्रातःस्नानादेः यागादेश्च कर्म्मणः दुःखात्मकतया तद्विषयकरागाभावेऽपि फलभूतस्वर्गादौ रागसत्त्वात् फलरागस्य कारणता, नारकजात्यारम्भकनिषिद्धस्त्र्यादिगमनरूपकर्म्मणश्च फले रागाभावेऽपि स्त्र्यादिविषये रागसत्त्वात् तत्र प्रवृत्तिविषयरागस्य विपाकारम्भे कारणतेति । "विशेषतः"=फलविषयकरागप्रवृत्तिविषयकरागेत्यादिविशिष्टरूपेण । "सामान्यतः"=रागत्वपुरस्कारेण । "निषिद्धस्त्र्यादिगामिनां"=परस्त्र्यादिगामिनाम्, एतद् नरकादिफलकनिषिद्धसर्वकर्म्मणामुपलक्षणम्, "स्त्र्यादिरागादेव"=प्रवृत्तिविषयरागादित्यर्थः । "एव"कारेण फलरागव्यावृत्तिः । "तप्तलोहे"ति=नरकस्वरूपकीर्त्तनम्, अत्र प्रमाणम् ॥ "तथाऽऽक्रम्य पारदारान् ज्वलन्तीमायसीं शिलाम्" इत्यादिपुराणवचनम् ।" (च)

पातञ्जलादौ अविद्याऽस्मितारागद्वेषाभिनिवेशाख्यक्लेशपञ्चकानामेव विपाकारम्भे कारणत्वमुक्तम्, तथा च पातञ्जलसूत्राणि,—अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्चक्लेशाः ॥ २ । ९ । अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या । २ । ३ । दृग्दर्शनशक्त्योरेकात्मतेवास्मिता । २ । ६ । सुखानुशयी रागः । २ । ७ । दुःखानुशयी द्वेषः । २ । ८ । स्वरसवाही विदुषोऽपि तथारूढोऽभिनिवेशः । २ । ९ । क्लेशमूलः कर्म्माशयो दृष्टादृष्टजन्मवेदनीयः । २ । १२ ।

"तदेव सक्तः सह कर्म्मणैति लिङ्गं मनो यत्र निषिक्तमस्य।

इति श्रुतावभिमानरागद्वेषादिजन्यस्य विषयवासनाख्यसङ्गसामान्यस्यैव जन्मादिविपाकारम्भे कर्म्मसहकारित्वसिद्धेः।

यत्र यत्र मनोदेही धारयेत् सकलं धिया।
स्नेहाद् द्वेषाद्भयाद्वाऽपि याति तत्तत्स्वरूपताम्।

इत्यादिस्मृतेश्च। (छ)

इति। तत् कथमुदाहृतश्रुत्यादिप्रामाण्यात् केवलस्यैव रागस्य कारणता वक्तुं शक्यते, बहुप्रामाणिकश्रुतिसूत्रादिविरोधादिति शङ्कते,—"यद्यपी"ति।

क्लेशपञ्चकानां विपाकारम्भकारणत्वे श्रुतिप्रामाण्यं दर्शयति "तदेव" इति। तदेव एति गच्छति, "सक्तः"=आसक्तः=विषयवासनाख्यसङ्गविशिष्टः=तत्तद्विषयकोद्भूतमनोवृत्तिकः सन्। कथमेति? "सह कर्म्मणा"=यत् कर्म्म फलासक्तः सन् अकरोत्, तेन कर्म्मणैव सह एति तत्फलमिति; किं तत्? "लिङ्गं"=मनः, लिङ्गशरीरे मनसः प्राधान्यात्, तत् मनः, यस्मिन् "निषक्तं"=निश्चयेन सक्तम् उद्भूताभिलाषमित्यर्थः। "अस्य"=संसारिणः। तदभिलाषेणैव हि तत्कर्म्म कृतवान्, तस्मात् तत्तन्मनोऽभिषङ्गवशादेव अस्य तेन कर्म्मणा तत्फलप्राप्तिः। तेन एतत् सिद्धं भवति, कामाद्यन्तःकरणवृत्तय एव मूलं संसारस्येति। स्वयमेव श्रुत्यर्थसारं संगृह्णाति,—"श्रुतावभिमाने"ति। "अभिमान"शब्देन=अनित्यादौ नित्यादिबुद्धिरूपाविद्योक्ता; "रागा"दयस्तु व्याख्याताः। "विषयवासना"शब्देन विषयानुभवजन्यसंस्कारवशतः तत्र इष्टसाधनतादिज्ञानपूर्वकरागादिरूप उत्कटाभिलाषादिः उक्तः। स एव="सङ्गः"। "सामान्य"शब्देन विशिष्टरागादिः व्यावर्त्त्यते। "जन्मादी"ति=जन्म=जातिः=अपूर्वदेहेन्द्रियादिसम्बन्धः, "आदि"शब्देन=आयुर्भोगौ उच्येते। "कर्म्मसहकारित्वं"=कर्म्मजन्यस्य विपाकस्य जनकत्वम्। "सिद्धेः"=प्रमाणेन निश्चयात्।

अत्र स्मृतिं प्रमाणयति,—"यत्र यत्रे"ति। यत्र यत्र यस्मिन् यस्मिन् दृष्टे विषये "मनो"=मननशक्तिकम् अन्तःकरणम्, "धिया"=बुद्ध्या=निश्चयात्मकवृत्तिमत्या, मनसः बुद्धिद्वारेणैव आत्मनि विषयसमर्पणात् तस्याः करणत्वम्। सकलं यथा स्यात् तथा धारयेद् विषयाकारतया परिणमय्य आत्मनि समर्पयेत्, मनसा विषयं गृह्णीयादित्यर्थः। मनसो विषयनिवेशे हेतुमाह,—"द्वेषात्"=

तथाच "क्लेशमूलः कर्म्माशयः" । (२।१२)

सति मूले तद्विपाको जात्यायुर्भोगाः । २ । १३

इति योगसूत्राभ्यामप्यदृष्टे तद्विपाकारम्भे च क्लेशानां हेतुत्ववचनाच्च । (ञ)

तथाप्यविद्यास्मितासत्त्वे रागस्यावश्यकत्वाद् द्वेषभययोश्च रागमूल-

---

शात्रवादौ द्विष्टत्वज्ञानात्, 'स्नेहात्'–पुत्रादौ इष्टत्वज्ञानात्, भयात्–प्रतिपक्ष-हिंसादौ अभिनिवेशाख्यत्रासवशात् । "याति"–आप्नोति, ततत्तत्स्वरूप-ताम्–तत् तद्विषयाकारताम्, तत्तदनुकूलम् जात्यादिकं प्राप्नोति इत्यर्थः । तत्रैव पातञ्जलसूत्रं प्रमाणयति,–"क्लेशमूल"इत्यादि । "क्लेशमूलः कर्म्माशयो दृष्टादृष्टजन्मवेदनीयः" इति सम्पूर्णसूत्रम् । अविद्यास्मितारागद्वेषाभिनिवे-शाख्यक्लेशपञ्चकमूला वासनाः–तज्जन्यफलविशेषाः, अस्मिन् जन्मनि अनु-भवनीया जन्मान्तरे वा इति सूत्रार्थः । "सति मूले"त्यादि अपरं पातञ्जलसूत्रम्,–अविद्यादौ क्लेशे सत्येव कर्म्मणां विपाकः–फलम्,–जात्यायुर्भोगाः, ब्राह्मणत्वा-दि"जाति", चिरकालं कायसम्बन्धः–"आयुः", 'भोगाः"–विषयाः । संक्षेपेण सूत्रद्वयार्थं कथयति,–"अदृष्टे तद्विपाकारम्भे चे"ति । अदृष्टम्–शुभाशुभकर्म्मजन्यः आशयाख्यः संस्कारविशेषः । विपाकारम्भे–जात्यायुर्भोगोत्पत्तौ "हेतुत्ववचनात्"–सहकारित्वकथनात् । एतैः श्रुतिस्मृतिसूत्रैः क्लेशपञ्चकानामेव कारणत्वं सिद्धमित्यर्थः । (ञ)

अस्यामाशङ्कायाम् उत्तरमुच्यते,–"तथापी"ति । "तथापि"–क्लेशपञ्चकानां विपाकारम्भकारणत्वस्य श्रुत्यादिसिद्धत्वे सत्यपि ।"अविद्यास्मितासत्त्वे रागस्य आ-वश्यकत्वात्"–रागम् अनुत्पाद्य अविद्यास्मितयोः अदृष्टोत्पादनेऽसामर्थ्येन केवल-योस्तयोर्विपाकारम्भेऽकारणत्वात् । "द्वेषभययोश्च रागमूलकत्वात्,–रागाभावे तयो रनुत्पादाद् असत्त्वेनाकारणत्वात्, "मुख्यतः"–प्रधानतः । अस्यायमर्थः,–आदौ तावत् प्राक्तनसंस्कारवशतः अनात्मनि प्रकृत्यादौ आत्मबुद्धिरूपा मोहापरा-भिधानाऽविद्या उत्पद्यते। ततश्च दृग्दर्शनशक्तिरूपयोः बुद्धिपुरुषयोः एकताप्रत्य-यरूपाऽस्मिता समुपजायते । तदनन्तरम् "अहङ्कर्त्ता भोक्ते"त्यादिरूपाभिमानाद् भोगाद्यनुकूलेषु स्निह्यति, तस्मात् स्नेहात्मकाद् रागाच्च तदुपकाराय प्रवर्त्तमानः मनसा, वाचा, कायेन च कर्म्म अनुतिष्ठति, कर्म्मणा च आशयाख्यमदृष्टमुपचिनोति, एवं भोगपरिपन्थिनं द्वेष्टि, द्वेषाच्च तथैव तदपकाराय प्रयतमानः अदृष्टम् उपार्ज-

कत्वाद् राग एव मुख्यतो जन्मादिहेतुतया यथोक्तवाक्ये निर्दिश्यत इति । (भ)

ननु "क्षीयन्ते चास्य कर्म्माणि तस्मिन् दृष्टे परावरे ।" (मुण्ड ॥ २।८ ॥)

यति, अदृष्टाच्च जन्मादयः समुपजायन्ते । द्वेषस्य रागपूर्वकत्वाद् अत्रापि राग एव मूलम्, इत्थम् इष्टवस्तुनाशाशङ्कया समुपजायमानो भयाख्योऽभिनिवेशो रागमूलक एव । अविद्यास्मिते अपि रागम् अनुत्पाद्य न अदृष्टमुत्पादयितुं प्रभवतः, अदृष्टं विना जन्मादयो न जायन्ते, इत्यतस्तयोरपि रागद्वारेणैव विपाकारम्भे हेतुता । अपि च विविधयोनिहेतुभूतशुभाशुभकर्म्मजन्यादृष्टेषु सत्सु यत्र रागा-दिरन्तकाले उद्बुद्धस्तिष्ठति मरणोत्तरं तामेव योनिं जीवः प्राप्नोति, न इतराम्, अतः उद्बुद्धरागसहकृतस्यैव अदृष्टस्य विपाकारम्भकत्वदर्शनात् तादृशरागाभावे विपाकारम्भादर्शनाच्च अन्वयव्यतिरेकाभ्याम् रागादिर्दोषो विपाकहेतुः,— "वीतरागजन्मादर्शनादि"त्यादिन्यायसूत्रमप्यत्र प्रमाणम् । एतेन एतदुक्तम्,— सर्वत्र रागस्य कारणतादर्शनात्, तदभावेऽन्येषामकार्य्यकरत्वात्, रागस्यावश्यहेयतया च तस्यैव कारणता उदाहृतश्रुतिस्मृतिसूत्रवाक्यैः निर्दिश्यते । अन्येषां कारणता तु न निषिध्यते, अतः सर्वानुगततया मूलकारणं पुनः अविद्यैवेति स्थितम् । "अविद्या क्षेत्रमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणामि"ति पातञ्जलसूत्रादिति । (भ)

विवेकज्ञानेन "क्षीयन्ते"इत्यादिश्रुतिसिद्धं कर्म्मणः नाशमनङ्गीकृत्य "पूर्वोत्पन्नकर्म्मणां चाविद्यादिसहकार्य्युच्छेदरूपदाहेने"ति यत्नेन प्रागुक्तदाहकल्पने कर्म्मनाशप्रतिपादकश्रुत्या विरोधं शङ्कते,—"नन्वि"ति । कर्म्मनाशप्रतिपादिकां श्रुतिमुदाहरति,—" क्षीयन्ते " इति । " भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः " इति श्रुतेरस्याः पूर्वार्द्धम् । अनया श्रुत्या विवेकेनात्मसाक्षात्कारस्य फलमभिधीयते । अस्या अर्थः—"हृदयग्रन्थिः"=अविद्यावासनामयः बुद्ध्याश्रयः कामः, " कामा येऽस्य हृदि श्रिताः " इत्यादिश्रुतिप्रामाण्याद् हृदयाश्रयोऽसौ नात्माश्रयः । " भिद्यन्ते "=भेदं विनाशम् उपयान्ति । " सर्वसंशयाः "=ज्ञेयविषयाः सर्वे संशयाः, "छिद्यन्ते"=विच्छेदम् आयान्ति । अस्य विच्छिन्नसंशयस्य निवृत्ताविवेकस्य, "कर्म्माणि"=विवेकोत्पत्तेः प्राक् अस्मिन् जन्मनि जन्मान्तरे च कृतानि अप्रवृत्तफलानि, विवेकोत्पत्तिसहभावीनि च पुण्यापुण्यात्मककर्म्माणि क्षीयन्ते नाशमुपयान्ति, नत्वेतज्जन्मारम्भकाणि कर्म्माणि नश्यन्ति तेषां प्रवृत्तफलकत्वात् । " तस्मिन् परावरे "=सर्वोत्कृष्टेऽसंसारिणि आत्मनि । " दृष्टे "—